Shri Raghunatha Temple MSS. Library,
JAMMU

६० २२

No. १६३३ क

Title दक्षिणामूर्त्तिसंहिता

Author

Extent ८३ पत्र Age सं. १९५०

Subject तन्त्र

नं.१५२ दक्षिणामूर्तिसंहिता

नं. ५८५

दक्षिणामूर्तिसंहिता

नं. १६३३

13

दक्षिणामूर्तिसंहिता

द॰
सू॰
१

ॐ श्रीगणेशाय नमः श्रीमच्छ्रीकोशहृदयं पं
च सिंहासनात्मकम् फलेकल्पलतानां च पंच
रत्नस्फुरत्कले १ चतुरायतनानन्दि चतुरन्वय
कोशगम् नित्यानन्दि परब्रह्मधाम नौमि सु॰
खाश्रये २ श्रीदेव्युवाच कृपां कुरु महादेव क
थयानन्दसुन्दर किं तद्ब्रह्ममयं याम श्रोतुमि
च्छामि तत्त्वतः कथं श्रीमहितं देव श्रीकोशहृ
दयं कथम् पंचसिंहासने सेव्यं कथं कल्पलता
त्मकम् ४ कथं रत्नात्मके देव कथमायतना
त्मके कथमाम्नाय संसेव्यं कथं नित्यात्मकं प्र॰
भो ५ श्रीईश्वर उवाच एतत्सर्वात्मकं वत्स त्रि
पुरा परमेश्वरी चतुर्लक्ष्मीसेव्यमाना तदाका
मडुयावरा ६ श्रीविद्या च तथा लक्ष्मी महालक्ष्मी
लक्ष्यैव च त्रिशक्तिः सर्वसाम्राज्यलक्ष्मीः पंचप्र
कीर्त्तिताः ७ वारुणान्ते वह्निसंस्थं दीर्घनेत्रसम
न्वितम् बिन्दुनादात्मकं वीजं लक्ष्मीमन्त्र उदाहृ
तः ८ ऋषिर्भृगुर्निवृच्छन्दस्तथा श्रीदेवता प्रिये
शान्तयोर्वीजशक्ती च कीलकं रेफ उच्यते ९
द्वितीयेन चतुर्थेन षष्ठेनार्केण सुन्दरि इन्द्रे
ण चन्द्रकलया विद्यां संसेव्य सुन्दरि १० षडंगा

निन्यसेन्मंत्री हृच्छिरश्च शिखां ततः कवचं ने
त्रमस्त्रं च नमः स्वाहा क्रमेण च ११ वषट्हुं
वौषडुं संच फडेभिः सह विन्यसेत् अष्टपत्रं
लिखेद्यंत्रं वह्निर्भूविंबमालिखेत् १२ मध्ये पु
ष्पं विनिःक्षिप्य पीठशक्तीः समर्चयेत् विभू
तिरुन्नतिः कान्तिः सृष्टिः कीर्तिश्च सन्नतिः १३
पुष्टिरुत्कृष्टिरृद्धिश्च वसुदिक्षु प्रपूजयेत् म
ध्ये सिंहासने पूज्यं सर्वशक्तिमयं प्रिये १४ ध्या
येत्ततः श्रियं रम्यां सर्वदेवनमस्कृतां तप्तका
र्तस्वराभासां दिव्यरत्नविभूषिताम् १५ प्रसि
ञ्चमानाममृतैर्मुक्तारत्नद्रवैरपि शुभ्राभा
भेभयुग्मेन मुञ्जमुञ्जरपि प्रिये १६ रत्नौघ
वद्धमुकुटां शुद्धक्षौमांगरागिणीं पद्माक्षीं
पद्मनाभेन हृदि चिन्त्यां स्मरेद्बुधः १७ एवं
ध्यात्वा यजेद्देवीं पद्मयुग्मधरां सदा वरदा
भयशोभाढ्यां चतुर्बाहुं त्रिलोचनाम् १८ आ
वाहनादिमुद्राश्च क्रमेणैव प्रदर्शयेत् उद्धा
न्नलिमयः कुर्यादिहमावाहनी भवेत् १९
इयं तु विपरीता स्यात्तदा वै स्थापनी भवेत् उ
र्ध्वांगुष्ठमुष्टियुगं तदेयं सन्निधापनी २० अ

द॰
मू॰
२

2

तरंगुष्ठमुष्टिभ्यां तदेयं सन्निरोधिनी तर्जनी
भ्यां परिभ्राम्य सकलीकरणं भवेत् २१ अंजली
वाच्छ्य वक्रता परमीकरणं भवेत् परिवर्त्यक
रौ मंत्री तर्जनीं च कनिष्ठिके २२ मध्यमाना
मयुगले स्थापयेत्तु परस्परं अमृतीकरणं
देवि मुद्रेयं धेनुरूपिणी २३ एतास्सामान्यमु
द्रास्तु दर्शयित्वा यजेत्स्त्रियै गंधपुष्पादिभिः स
म्यक् सर्वकामार्थसिद्धये २४ अग्नेशास्त्ररवा
यव्यमध्ये दिक्त्वंगपूजने चलाका विमला
चैव कमला च नमालिका २५ विभीषिका मा
लिका च शांकरी च स्नमालिका पुरस्तादिक्र
मेणैव प्रादक्षिण्येन पूजयेत् २६ इंद्राग्निय
मनैर्ऋत्यवरुणानिलसंज्ञकान् कुबेरेशान
लोकेशान्भूर्वि वेचक्रमाद्यजेत् ब्रह्माविष्णु
श्च लोकेशश्चोर्ध्वाधः क्रमतो यजेत् अर्कलक्षं
जपेन्मंत्रं तद्दशांशेन होमयेत् २८ पंचेस्त्रिम
धुमिश्रैस्तु पुरश्चारी ततो भवेत् एवं संसिद्ध
मंत्रस्तु सर्वसाम्राज्यदो भवेत् २९ इति श्रीद
क्षिणामूर्तिसंहितायां पकारे लक्ष्मीपूज
नविधिः प्रथमः पटलः १ ईश्वर उवाच अ

वक्ष्ये महेशानि लक्ष्मीहृदयमुत्तमं यस्यवि
ज्ञानमात्रेण पलायंते महापदः १ प्रणवं
पूर्वमुच्चार्य हरीमात्मकमक्षरं श्रीपुटेवाथ
कमले ब्रह्माभानुस्तथैव च २ लापेमध्यग
तो भूमिरुद्रस्थाने तु योजयेत् प्रसीदयुगलं
पूर्ववीजानि संपुटेन च ३ महालक्ष्मीहृदंतो
यमष्टाविंशतिवर्णवान् दत्तप्रजापतिश्चा
स्य ऋषिः छंदस्तथैव च ४ गायत्री देवताल
क्ष्मीहृदयं परिकीर्तितं द्वितीयं च तृतीयं च
वीजशक्तिक्रमेण च ५ प्रणवः कीलकं देवि
तेनांगानि प्रविन्यसेत् अंगानि पूर्ववद्देवि म
सेन्मंत्री समाहितः ६ रत्नोचदसुपत्रांतपद्म
युग्मवहेमजं अग्ररत्नावलीराजदादर्शदय
तीपरा ७ चतुर्भुजा स्फुरद्रत्ननूपुरा मुकु
टोज्वला ग्रैवेयांगदहाराढ्या किंकिणी रत्न
कुंडला ८ पद्मासनसमासीना हस्तीभिर्मंडि
ता सदा शुक्लांगरागवसना महादिव्यांगना
नना ९ एवं ध्यात्वा च यो देवीं पूर्वयंत्रे च पूर्व
वत् आदावंगानि संपूज्य पूर्ववत्परमेश्वरी
भारती पार्वती चंडी शची दिक्षु प्रपूजयेत् १

श्रीपरस्रग्हृषीकेशो वैकुंठो विश्वरूपधृक ११
विदित्व पूजयेदेताः सर्वसिद्ध्यर्थहेतवे अनु
रागो विसंवादो विजयो वल्लभो मदः १२ हर्षो ब
लं च तेजस्वी प्रश्रयारभ्य पूजयेत् इंद्रादींश्च व
संपूज्य पुनर्देवीं यजेत्सुधीः १३ लक्षत्रयं जपे
न्मंत्रं नियमेन तु साधकः तद्दशांशेन पद्मैस्तु
जुहेन्संपतिमिच्छता १४ महागजतुरंगाश्च
जायंते तस्य मंदिरे सुवर्णरत्नभूषादिमंडि
तः साधको भवेत् १५ इति श्रीदक्षिणामूर्ति
संहितायां महालक्ष्मीपूजनविधिः द्वितीयः
पटलः २ ईश्वर उवाच त्रिशक्तियजनं वक्ष्ये
सर्वसिद्धिप्रदं नृणां श्रीबीजं च पराबीजं का
मबीजं समालिखेत् १ इयं त्रिशक्तिर्देवेशि
त्रिषु लोकेषु दुर्लभा ऋषिर्ब्रह्मास्य गायत्री छं
दोपि कथितं प्रिये २ त्रिशक्तिर्देवतांगानि द्वि
राहृत्या जपेत्प्रिये अथ यंत्रं प्रवक्ष्यामि साधका
नां हिताय च ३ षट्कोणं पूर्वमालिख्य मध्ये तु
विलिखेत्सुधीः बीसपातांतु षट्कोणे कोणे
षुक्रमतो यजेत् ४ बाह्ये वसुदलं कुर्याद्दीर्घस्व
रविभूषितं चतुरस्रं च तद्द्वारं भूषितं मंडलेलि

त् ५ मध्ये समावाह्य देवीं ध्यायेत्सर्वसमृद्धि
दे नवहेमस्फुरद्भूमिरत्नकुट्टिममंडपे ६
महाकल्पवनांतस्थरत्नसिंहासने वरे क
मलासनशोभाढ्या रत्नमंजीररंजिता ७
स्फुरद्रत्नलसन्मौलि रत्नकुंडलमंडिता अ
नेतरत्नखचितनानाभूषणभूषिता ८ द
धती पद्मयुगलं पाशांकुशधनुःशरान् ष
डभुजा मिंडवदना दूतीभिः परिवारिता ९
चारुचामरहस्ताभा रत्नादर्शस्नपाणिभिः तां
बूलस्वर्णपात्रीभिर्भूषापेटीस्नपाणिभिः १०
नम्रकांतस्वराभासां पूर्वोक्ते मंडले यजेत् उ
पचारैः समाराध्य ततोगावरणं यजेत् ११ पूर्व
वत्परमेशानिपरिवारांस्ततोर्चयेत् लक्ष्मीह
रिंच गिरिजां शिवरत्यगजौ क्रमात् १२ अग्र
कोणादिसंपूज्य ततः षट्कोणपार्श्वयोः शं
खपद्मनिधी पूज्यौ वसुपत्रेषु मातरः १३ ब्रा
ह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा वारा
ही चैव माहेंद्री चामुंडा सप्तमी भवेत् १४ म
हालक्ष्मीर्महादेवी पुरस्तादिति पूजयेत् इं
द्रादयस्ततः संपूज्या कामिनीरूपधारिणः १५

उत्तेगंधैर्वनोत्तमादेव्याराधनतत्पराः ल
लत्रयंजपेन्मंत्री नियमेन जितेंद्रियः ८
तद्दशांशेन देवेशि किंशुकैर्होमयेत्सुधीः
अनेन विधिना मंत्री पुरश्चारी भवेत्प्रिये ९
इति श्रीदक्षिणामूर्तिसंहितायां त्रिशक्तिल
क्ष्मीयजनविधिस्तृतीयः पटलः ३ ईश्वर उवाच
अथ वक्ष्ये महादेवि सर्वसाम्राज्यदेवता य
स्याआराधनाद्विस्नुरभूलक्ष्मीपतिः स्वयं १
वंदशमादनेस्मिशवक्तिदीर्घोत्तिमंडितं वि
डकूटेश्वरीयुक्तं विद्येयं वै सर्वार्थिदे २ श्रीवी
जसंपुटंकुर्यात्सा वै साम्राज्यदायिनी ऋषि
र्हरिलक्षाछंदो गायत्री चास्य संमता ३ देवता
मोहिनी लक्ष्मी महासाम्राज्यदायिनी वीजकू
टसमाख्यातं शक्तिः श्रीवीजमुच्यते ४ षड्
गयैः स्वरैर्भिन्नैः षडंगानि प्रविन्यसेत् अतसी
पुष्पसंकाशां सर्वरत्नविभूषितां ५ शंखच
क्रगदापद्मशार्ङ्ग-बाणधरांकरैः खड्गैः क
राभ्यां देवेशि वरदाभयशोभितां ६ एवम
ष्टभुजां ध्यात्वा रविलक्षंजपेद्बुधः तद्दशां
शेन पद्मैस्तु जुहेनैस्साम्राज्यसिद्धये ७ ।

जितेंद्रियःसविधिवद्यंत्रोद्धारंशृणुप्रिये
त्रिकोणंचाष्टयंत्रंचभूविंबंचततोलिखेत्
चतुर्द्वारंसुशोभाढ्यंयंत्रमेतत्समालिखेत्
अस्मिन्समावाह्यदेवींपूजयेदुपचारकैः ७
पूर्ववत्परमेशानिषडंगावरणंयजेत् गा
यत्रीचैवसावित्रीसरस्वत्यग्रभागतः ८
क्रमेणपूजयेद्देविब्राह्म्याद्याश्चदलैःपृथक्
अष्टपत्रेषुभूविंवेत्तेकोणाग्रेणपूजयेत् ९
अष्टादशमहाकोटियोगिनीभ्योनमोलिखेत्
अनेनमनुनापश्चाद्दिक्पालादीन्पूजयेत्ततः १०
पुनर्देवींसमभ्यर्च्यगंधपुष्पाक्षतादिभिः व
टुकक्षेत्रपालेभ्योयोगिनीभ्योवलिंहरेत् ११
इतिश्रीदक्षिणामूर्तिसंहितायांसाम्राज्यविद्या
यजनंनामचतुर्थःपटलः ४ ईश्वरउवाच
अथश्रीकोशविधानंचतुर्थंशृणुपार्वती य
स्यविज्ञानमात्रेणपुनर्जन्मनविद्यते १ श्री
विद्याचपरंज्योतिःपरंनिष्कलदेवताः अ
जपामातृकाचैवपंचकोशाःप्रकीर्तिताः २
प्रणवंपूर्वमुच्चार्यमायांहंसःपदंलिखेत् त
तःसोहंशिरोदेविवसुवर्णीयमीरिताः ३

प्रणवश्चित्कलाज्ञेयामाययाव्याप्तरूपिणी
हंसःपदेतदेवेशिसाक्षादात्मस्वरूपिणी ४
तत्रत्यविंदुत्रितयात्सृष्टिस्थितिलयात्मिका
प्रसूतेविंदुनादेनवामेयंब्रह्मरूपिणी ५
विंदुनाथद्वितीयेनपालयंतीजगत्त्रयम्
ज्येष्ठेयंवैष्णवीमायाश्राद्यासत्वगुणाश्रिये ६
श्रेषेनविंदुनासर्वंग्रसंतीतमसावृता रौद्री
विंदुत्रयेदेविप्रसूतेचांबिकातदा ७ आत्मा
नंदर्शयत्येषाहंसाख्यामहतियदा तदे
यंदर्पणाकारातत्तोज्योतिर्मयीभवेत् वर्ण
भ्यांवह्निजायायाःपरंज्योतिरियंप्रिये एवं
विचारयन्मंत्रीसाक्षाद्ब्रह्मभवेत्समः ऋषिर्ब्र
ह्मास्यमंत्रस्यगायत्रीछंदउच्यते परंज्योति
र्मयीसाक्षाद्देवतापरिकीर्तिता ९ प्रणवो
स्यहंबीजंशक्तीशोपवकीलकं स्वाहांत
हृदयंसोहंशिरोहंसःशिखाभवेत् १० मा
ययाकवचंतारवीजेननयनत्रयम् स्पष्ट
मंत्रेणदेवेशिसमग्रेणास्त्रकंभवेत् १२ ज्ञा
नाग्नौमातृकावर्णहविषाचाक्षराक्षतीः अ
नेनमनुनाहुताद्वर्णैनिर्वाणगोभवेत् १३

इति श्रीदक्षिणामूर्त्तिसंहितायां मात्माष्टाक्ष
रपरंज्योतिर्विधानं नाम पंचमः पटलः ५ ईश्व
र उवाच अथ वक्ष्ये महादेवि परनिष्कलदेवतां
यस्याः स्मरणमात्रेण चिदानंदायते तनुः १ अ
नुग्रहादि देवेशि बिंदुनादकलात्मकं पर
निष्कलदेवीयं परब्रह्मस्वरूपिणी २ शुक्लांब
रपरीधाना शुक्लमाल्यानुलेपना ज्ञानमुद्रां
किता योगीपतिवृंदेन सेविता ३ ऋषिर्ब्र
ह्मास्य गायत्री मनोः छंदः क्रमाद्देवत ब्रह्मे
व देवता वीजं शक्तिस्तत्क्रमेण तु ४ मका
रकीलकं मोक्षफलज्ञानप्रदायिनी स्वरद्वं
द्वस्यमध्ये तु लिख्यात्मकाचतुष्टयम् ५ ऋ
ॠऌॡ च देवेशि षडंगानि प्रविन्यसेत् त ६
तो यंत्रं लिखेन्मंत्री त्रिकोणं चाष्टपत्रकम्
चतुरस्रं चतुर्द्वारमंडितं ज्ञानदं भवेत् ब्र
ह्मरंध्रे विचिंत्याथ तत्रावाह्य परेश्वरीम् ७
गंधपुष्पादिभिः सम्यङ्नानैरुपचारकैः
अग्नीशासुरवायव्यमध्यदिक्षु गपूजनम् ८
अकारेण च ऋग्रूपं ब्रह्माणं पुरतो यजेत्
सामवेदेन सहितमुकारेण हरिं यजेत् ९

द· म·
६

6

देवी दक्षिणतः पश्चाद्दैत्यकोणे शिवं यजेत्
यज्ञः स्वरूपकालेन त्रिकोणे कथिते प्रिये १०
षट्पत्रे च तद्दिक्षु पश्चादिक्रमेण तु आत्मा
न्तरात्मा परमज्ञानात्मानो पूजेत् प्रिये ११ निवृ
त्तिश्च प्रतिष्ठा च विद्या शान्तिश्च तत्पदम् विदि
क्षु पूजयेन्मन्त्री ततो ब्रह्मादिकान्यजेत् १२
तेष्वेव वसुपत्रेषु चतुरस्रे ततः परम् इं
द्रादीन् लोकपालांश्च पूर्वादिक्रमतो यजेत्
गन्धपुष्पादिनैवेद्यतर्पणैः परितोषयेत्
ज्ञानरूपो भवेन्मन्त्री मोक्षस्य करे स्थितः १५
इति श्रीदक्षिणामूर्तिसंहितायां षण्णव वि
चार निष्कलदेवतापूजाविधिर्नाम षष्ठः पट
लः ६ ईश्वर उवाच अजपापारायणं देवि कथया
मि तवानघे यस्य विज्ञानमात्रेण परब्रह्मैव दे
शिकः १ हंसः परं परेशानि प्रत्यहं जपते नरः
मोहबद्धो न जानाति मोक्षस्य न जायते २
श्रीगुरोः कृपया देवि ज्ञायते जप्यते तदा उ
च्छ्वासनिश्वासतया तदा बन्धः क्षयो भवेत् ३
उच्छ्वासे चैव निश्वासे हंस इत्यक्षरद्वयं तस्मा
त्प्राणस्तु हंसाख्यः आत्माकारेण संस्थितः ४

षष्टिश्वासैर्भवेत्प्राणः षट्प्राणा नाडिका मताः
षष्टिनाड्यास्त्वहोरात्रं जपसंख्याजपा मताः ५
एकविंशतिसाहस्रं षट्शताधिकमीश्वरि
जपते प्रत्यहं प्राणि सदानंदमयीं पराम् ६
उत्पत्तिर्जपआरंभोमृतिरस्यनिवेदनम् वि
नाजपेन देवेशि जपो भवति मंत्रिणः अज
पेयं ततः प्रोक्ता भवपाशनिकृंतनि श्रीगु
रोः कृपया देवि लभ्यते नान्यथा प्रिय एतं
जपं महेशानि प्रत्यहं विनिवेदयेत् गणे
शब्रह्मविष्णुभ्यो हराय च महेश्वरि जीवात्म
नेक्रमेणैव तथैव परमात्मनि षट्शतानि
सहस्राणि षडेव च तथा पुनः षट्सहस्रा
णि विमले सहस्रं चैकमेव हि ११ पुनः सह
स्रं गुरवे क्रमेणैव निवेदयेत् आधारे स्वर्ण
वर्णास्मिन्वादिशांतानि संस्मरेत् १२ द्रुत
सौवर्णवर्णानि वर्णानि परमेश्वरि स्वाधि
ष्ठाने विद्रुमाभे वादिलांतानि संस्मरेत् १३
विद्युत्पुंजप्रभाभानि सलिले मणिपूरके
डफांतानि महानीलप्रभानि च विचिंतयेत् १४
पिं वर्णे महावह्निकणिकाभानि चिंतयेत्

कादिगतानि वर्णानि च तत्र्थैर्नाहते प्रिये ६
विशुद्धे धूम्रवर्णांतरक्तवर्णान्स्वरान्न्यसेत
आज्ञायां विशुद्धाभायां शुभ्रौ हंसौ विचिंतयेत
कर्पूरद्युतिसंराजत्सहस्रदलनीरजे नादा
त्मकं ब्रह्मरंध्रे जानीहि परमेश्वरि ७ एते
षु सप्तचक्रेषु स्थितेभ्यः परमेश्वरि जप
निवेदयित्वा तन्महोरात्रभवे प्रिये ८ स
हजे परमेशानि न्यासं कुरु विचक्षणे ऋ
षिर्हंसो व्यक्तपूर्वं गायत्रीछंद उच्यते ९
देवता परमात्मा तु हंसो हंबीजमुच्यते सः
शक्तिः कीलकं सोहं प्रणवस्तत्वमेव हि २
नादस्थाने तथा श्वेतो वर्णस्तु परमेश्वरि उ
दात्तः स्वर इत्येवं मनोरस्य प्रकीर्तितः मो
क्षार्थी विनियोगः स्याद्देवं जानीहि पार्वती त
तः षडंगविन्यासं कुर्याद्देहस्य शुद्धये सूर्य
सोमं तथा देवि निरंजनमतः परम् निरा
भासं च तत्र्थं तत्स्वाहांतान्क्रमतो न्यसेत ११
करवचांतानि विन्यस्य ततोनंतपदं स्मरेत त
तु सूक्ष्मं च तत्र्थवर्णान्तु स्वादेवी प्रबोदयात् १४
स्वाहांतेनेचनयनमव्यक्तपदपूर्वकं १

९

प्रवोधात्मा चतुर्थ्यां निजपांतो स्ये निगद्यते २५
प्राणानायम्य विधिवन्मंत्री सम्यक्समाहितः
मूलमंत्रेण देवेशि वामेनापूर्य चोदरम् २६
कुंभकेन त्रिधा हृत्पद्दक्षिणेन च रेचयेत्
कनिष्ठानामिकांगुष्ठैर्यन्नासापुटधारणं २७
प्राणायामः स विज्ञेयः स्तर्जनीमध्यमे विना
अस्मिन्हंसस्य देवेशि निगमागमपक्षकौ २८
अग्नीषोमात्मकौ वापि पक्षौ तारः शिरो भवेत्
बिंदुत्रयं शिखा नेत्रे मुखे नादः प्रकीर्तितः २९
शिवशक्तिपदे हंस कालाग्निपार्श्वयुग्मकं
अयं परमहंसस्तु सर्वव्यापी प्रकाशवान् ३०
सूर्यकोटिप्रतीकाशः स्वप्रकाशेन भासते
संसाररूपी हंसोयं विवेकदर्शी यत्नपि ३१
अजपा नाम गायत्री विष्णुलोके सुदुर्लभा अ
नया जपतो नित्यं पुनर्जन्म न विद्यते ३२ ष
ट्शतान्यधिकान्यत्र सहस्राण्येकविंशति
अहोरात्रे चरेद्वायुः स जपो मोक्षदायकः ३३
इति श्रीदक्षिणामूर्तिसंहितायामजपावि
धानं नाम सप्तमः पटलः ७ ईश्वर उवाच
अथ वक्ष्ये महेशानि मातृकां लोकमातरम्

द·सू·

8

अकारादिक्षकारांतावर्णावयवदेवता १
ऋषिर्ब्रह्मास्यमंत्रस्यगायत्रीछंदउच्यते मा
तृकादेवतादेविहलोवीजास्तुशक्तयः २
स्वरास्तुपरमेशानिजानात्यक्तस्तुकीलकं
अनिर्वाच्याहलोवर्णाशक्त्याव्यक्ताभवंतिहि ३
शक्त्याविनाशिवेसूक्ष्मेनामधामनविद्यते अ
सद्रूपाहलोवर्णाःशक्त्यासत्तापराम्बुखाः ४
स्फुरन्मात्रासदोच्चार्यासंमुखोव्यक्तिवर्णकाः
ऋॠऌॡपरित्यज्यषण्मुखस्वरमध्यगाः ५
वर्गाषट्कक्रमेणैवसप्तमःक्रोधसंयुतः
एतेनित्यदेवेशिषडंगानिप्रविन्यसेत् ६
कलापद्मांबुजेकंठेस्वराःसम्यक्प्रविन्यसेत्
सूर्यपत्रांबुजेनित्येनाहतेद्वादशान्यसेत ७
मणिपूरेमहादेविदशपत्रेप्रविन्यसेत् ८
शवर्णेलिंगमध्येषट्दलेषट्तथैवहि ९
चतुर्दलेतथाधारेचतुर्वर्णास्तथान्यसेत्
भ्रूमध्येहिदलेहंलौविचिंत्यमातृकान्यसेत्
९ ब्रह्मरंध्रेतथाचक्रेचैवनेनयनद्वये श्रु
तिनासापुटद्वेद्वेगंडोष्ठद्वयकेशुच १०
दंतयुग्मेचमूर्द्धास्यद्वयेषोडशविन्यसेत्

दीः पंक्तिषिषु साग्रेषु पार्श्वयुग्मे न्यसेत्क्रमात्
पृष्ठनाभिहृदयेचैवजठरेविन्यसेदथ त्वगसृ
ङ्मांसमेदोस्थिमज्जाशुक्राणिधातवः १२ प्रा
णजीवौच परमोपकारादिषु संस्थितः क्र
मेणदेवदेवेशिन्यस्तव्यापतदात्मकाः १३
ण्ठदेशमूलेषु संन्यस्य तथापरगलेन्यसेत् क
लाहृदयेष्टदारभ्यपाणिपादहृदयेतथा जठ
रानननेयावर्णांभिन्यसेदित्यर्णञ्चपिणीम् त्रेन
नन्यासरूपेणमन्त्रीवर्णस्वरूपवान् १५ ध्या
येहर्णस्वरूपाख्यांस्वरवर्णक्रमेणहि क
चवर्गकारारभ्यांतदवर्गपर्वतुजे १६ पव
र्गचारुपार्श्वांगलसद्व्यातोदरीपराम् य...
वर्गांगसुभगांपीनोन्नतचनस्तनीम् १७ नि
तंबविंबगहनांसुक्तांतीत्ताममध्यमाम्
सुक्तमाल्यानुरागांगीमत्तसल्कांटिशाभिता
चित्तालिखितसत्पाणिंसमन्यवरदायिनीम्
एवंध्यात्वाततोदेवींयजनेचसुधीश्वरेत् १९
आदौहृत्तेकर्णिकांव्हेहंसानुग्रहसंभवान्
वाचिहृद्दलमालिख्यकेसरेषुस्वरान्न्यसेत् २०
युग्मयुग्मप्रभेदेनततोवसुदलेषुच कादि

वर्गाष्टके पीठमालतां तं परमेश्वरि २१ चतु
रस्रं ततः कुर्यात् सिद्धिदे दिक्षु संलिखेत्
ठकाराणां च तद्बाह्ये चैव रेखां तं वाह्यतस्तथा २२
वारुणं च समालिख्य देवीमावाहयेत् सुधीः
आदौ पीठार्चनं कृत्वा नवशक्तिपुरस्कृते २३
मेधा प्रज्ञा प्रभा विद्या धी धृति स्मृति बुद्धयः
विद्येश्वरी च पूर्वादि दिक्षु मध्ये प्रपूजयेत् २४
पश्चादावाह्य गंधादीनुपचारान् प्रकल्पयेत्
अग्नीशासुरवायव्यमध्यदिक्ष्वंगपूजनं २५
नियोज्य स्वरयुग्मानि तेन नमस्कारं पृथक्पृथक्
अष्टधा पूजयेद्देवि केसरेषु पृथक्पृथक् २६
तथैव कादिवर्गेषु नमस्कारं लिपेत् पृथक्
अष्टधा वर्गं पूजयेत् ततो ब्राह्म्यादिभिर्यजेत् २७
लोकपालैस्ततो देवीं समासमय यजेत्सुधीः
लक्षमात्रं दशांशेन जुहेन्मालाशतुष्टकैः वि
मधुक्तैर्मिताहारः पुरश्चारी ततो भवेत् २८
इति श्रीदक्षिणामूर्तिसंहितायां मातृकावि
धिर्नामाष्टमः पटलः ८ ईश्वर उवाच पं
चसिंहासनगता विद्या जप्या महेश्वरि म
यातस्तु कथ्यते तत्क्रमेण प्रिये १

अनया सदृशी विद्या त्रिषु लोकेषु दुर्लभा अप
वाद्यविंदुनादसहितं कुरु सुव्रते २ एतद्वा
ग्भवमुद्धार्य सकलं कामबीजकम् वामने
त्रे तु विन्दन्त सर्गं वाग्भवस्युरव्ययः ३ अनुग्र
हेण संयुक्तो विद्येयं ह्लादरी भवेत् ऋषिस्तु
दक्षिणामूर्त्तिः शिरसि विन्यसेत्ततः ४ छंदः
पंक्तिस्तु विज्ञेयं मुखे विन्यस्य देवताम् हृदये
परमेशानि वाग्भवं बीजमुच्यते ५ शक्तिबी
जं शक्तिरेव कामबीजं च कीलकं एषा विद्या
महेशानि पुरुषार्थप्रदायिनी ६ पादादिना
भिपर्यंतमायं नाभेर्लध्या गलम् मध्यमे शक्ति
बीजं च गलादामस्तकं न्यसेत् ७ वामपादत
ले तद्वद्दक्षपाणौ द्वयं न्यसेत् करयोः संपुटे
चैवमेवं न्यासद्वयं भवेत् ८ एतत्संपुटिता
पञ्चाशन्मातृकां विन्यसेत्सुधीः नवयोन्यंकिते
न्यासं कुर्यात्कमललोचने ९ कर्णयोश्चिबु
के देवि शंखयोश्च दृशोर्नसि अंसयोर्हृदये
दे विन्यसेत्कूर्परकुक्षिषु १० जानुद्वये पादयुग
हे हृद्गुह्ये पुक्रमतो न्यसेत् पार्श्वयोस्त्वस्थल
न्हे हृद्के ठेपि च विन्यसेत् बीजत्रकेक्र

सं. दं. १.

10

मेणैव नवधा विन्यसेत्प्रिये वीजयोगाति
विन्यस्य पंचवाणान्न्यसेत्सुधीः १२ दकारं
नसमालिख्य ह्रिधावह्निसमन्वितम् अ
नंतवामनेत्राभ्यां हि विंदुपरिभूषितम् १३
कामवीजं च कालादितवादिपृथिवीयुतं दी
र्घकर्णेन्दुविंदाढ्यमजपांतं क्रमात्लिखेत्
ललाटगलहृन्नाभिमूलाधारेषु विन्यसेत्
पुनरेतेषु वीजानि पंचसंख्यानि विन्यसेत् १४
क्लीं ह्रीं मात्मकवावीजं च तुर्थं वाणमालिखेत्
ततः स्त्रीमात्मकं पंचकामा एते प्रकीर्तिताः १५
एवं विन्यस्तदेहः सन्प्राणानायम्य पार्वति १
ध्यायेद्देवीमहेशानि कदंववनमध्यगाम् १६
रत्नमंडपमध्येतमहाकल्पवनांतरे मुक्ता
तपत्रछायायां रत्नसिंहासने स्थिताम् १७
अनर्घ्यरत्नघटितां मुकुटांकुंडलोज्वलाम्
हारग्रैवेयसद्रत्नविचित्रां कंकणोज्वलाम् १८
हारमुक्तालसद्भूषामुडतोमविराजिताम् हा
रमंजीरसुभगां रक्तोत्पलपदांबुजां २० सु
डागरागसुभगां कर्पूरसकलोज्वला मु
लके चाभयं वामे दक्षिणे चाक्षमालिका २१

वरदानरतां देवीं सम्यक्तारस्वतप्रदाम् ए
वंध्यात्वा जपेन्मंत्रं वर्णलक्षं समाहितः २२
अथवा देवदेवेशनन्दवेषं यदा भवेत् तदा
सर्वार्थदा विद्या भुक्तिमुक्तिफलप्रदाः २३ श्री
गुरोः कृपया लब्ध्वा सर्वकामार्थसिद्धये अ
थवा देवदेवेशि पद्मरागप्रभां स्मरेत् २३ र
क्तवस्त्रपरीधानां रक्ताभरणमंडितां हका
रार्द्धस्वरूपां च बिंदुत्रययुतां शिवे २४ एवं
कामकलाध्यानेन सदा वाणीः समुद्यतम् त
दशांशेन जुहुयात् किंशुकैस्त्रिमधूक्तैः
तर्पणं च दशांशेन लत्तैवायुत संख्यया व
र्णानुक्रमयोगेन गंगातोयेन वा प्रिये तर्प
णं च तथा भूयः कर्पूरवासितैर्जलैः अथ
वक्ष्ये महेशानि यंत्रं सर्वार्थसिद्धिदे २५ श्री
बीजशक्ति समालिख्य तस्योपरि संलिखेत्
तामेव विहरंतां किंचित्संपुटीकृत्य वह्निना
संधिभेदक्रमेणैव नवयोनिर्यथा भवेत्
ह्सौंकारं लिखेन्मध्ये कामाख्यं चाष्टयोनिषु
२६ वह्निगेहं ततः समालिख्य दलैर्जितमष्टभिः
केशरेषु स्वरान्योज्य हटन्रुपाः परमेश्वरि का

दे·स·
११

चटाक्षपयावर्णैः सलक्ता परमेश्वरि अ
ष्टपत्रेषु संलिख्य ततः शूलाष्टकं लिखेत् ११
पत्राग्रेषु ततो मंत्री लिखेद्वर्णानुक्रमेण तु
नेषु शूलेषु खगयाग्र्यं ततः क्रमतो लिखेत् १२
इ·छजान्नि दिग्भागे फजगान्दलिणो लिखेत्
उद्वर्णान्नैरते भागे थदयान्पश्चिमे लिखेत्
नफवान्वायुदिग्भागे भमरानुत्तरे लिखेत्
लवशानीशदेशे तु ततो हंसमालिखेत् १४
हंसं मातृकयावीजं ततो भूबिंबमालिखेत्
चतुर्द्वारविशोभाढ्यमध्येषु च विनिक्षिपेत् १५
पीठार्चने ततः कुर्यान्मंत्री देवि मनोहरम् वा
माज्येष्ठा च रौद्री च अंबिके ख्याततः परम् १६
ज्ञाना क्रिया कुब्जिका च विश्वा देवी विषघ्निका
दूतरी च तथानंदा संपूज्याः अभितः प्रिये १७
सिंहासनं च संपूज्य मध्यबीजेन मंत्रिकः
सदाशिवं महाप्रेतपद्मासनपदं लिखेत् १८
इं·तेन मंतकं देवि यजेत्सिंहासनं प्रिये मु
क्ताछत्रं शरच्चंद्रचंद्रिकाकारचामरे १९ उ
परि तिष्ठसबन्धकलाव्यजनयुग्मकम् शो
[illegible]ावली गजन्वर्णादर्शं च पीठिका ४·

अलंकारमयीं पेटीकारं ङ शशिपूरकं क
र्पूरतोदभरितं चषकं स्वर्णकं कती ५१
संस्थाप्य पूर्णिकाश्मीरपात्रं च वदपतीक्रमात्
ध्यात्वा वामादिका पश्चाद्देवीमावाहयेत्स्वधि
उपचारैः समाभ्यर्च्य तर्पणानि समाचरेत्
लयांगं विन्यसेद्देवि देहे मुद्रांश्च दर्शयेत् ५२
अग्नीशासुरवायव्यमध्ये दिक्षु गपूजने क्र
मेण पुरश्चारभ्य रति प्रीति मनोभवाः वि
कोणाग्रेषु देवेशि नन्दाय्या वाण देवताः दे
वताया दक्षिणे देवि वामे पृक मग्रतः अनं
गानंगकुसुमा तथा चानंगमेखला अनंग
मदना देवि सुभगा च भगा तथा भगसर्पि
णि तथा देवि तथा च भगमालिनी पुरश्चार
भ्य देवेशि प्रादक्षिण्येन पूजयेत् अष्टको
णेषु तद्बाह्ये वसुपत्रेषु चार्चयेत् असितां
गं तथा ब्राह्मी रुरुं माहेश्वरी तथा ५४ चं
डं कौमारिकां चैव क्रोधं चैव तु वैष्णवीम् उ
न्मत्तं चैव वाराही तथा चैव कपालिनी ५५
माहेन्द्रीं भीषणं देवि चामुंडां च ततः परम् सं
हारभैरवं देवि महालक्ष्मीं क्रमाद्यजेत् ५६

दं·स
१२
12

युग्मायुग्मप्रभेदेनसर्वैर्देवीश्चभैरवान् का
मरूपंतथादेविमलयंचद्वितीयकम् ४७
पीठंकोलगिरिंपीठंकुलान्तकमतःपरम्
चौहारंचैवदेवेशिजालेधरमतःपरम् ५०
कपालिनंचकपादंभीमरूपमतःपरम् अ
वलंद्घाटकंचैवपुरश्चारभ्यपूजयेत् ५१ अ
थडईस्तनोदेविचत्वरस्थेक्रमेणत इंद्रादय
स्तमंपूज्यास्ततस्तवटुकादयः ५२ वटुकं
योगिनीक्षेत्रपालंगणपतिंयजेत् पूर्वादि
दिक्षुकोणेषुवसूनक्रौक्रमात्प्रिये ५३ रु
द्राश्चसर्वभूतांश्चपुनर्देवीसमर्चयेत् वन
स्पतिरसोत्पन्नोगंधाढ्योगंधउत्तमः ५४
आघ्रेयःसर्वभूतानांधूपोयंप्रतिगृह्यताम्
एवंमंत्रंत्रिबीजांतेधूपमंत्रमुदाहृतः स्वप्र
काशोमहादीपःसर्वतस्तिमिरापहः सबा
ह्याभ्यंतरंज्योतिर्दीपोयंप्रतिगृह्यताम् ५६
तथैवदीपमंत्रोयंशृणुचारार्तिकंप्रिये सम
स्तचक्रस्थद्धस्मितंमंडलेब्रह्मरूपिणी ५७
आरार्तिकंगृहाणेदंत्रिपुरेममसिद्धये आ
रार्तिकमिदंदेविविद्यातेमनुरीरितः ५८

हेमपात्रगतं दिव्यं परमान्नं सुसंस्कृतम्
पंचधा षड्रसोपेतं गृहाण परमेश्वरि ५९
उपहारमनुर्देवि विविच्यैतस्वयमीरितः य
थाशक्तिजपं कृत्वा नित्यहोमं समाचरेत ६०
पंचाहुतिस्तु मूलेन षडंगानि च होमयेत्
नित्यहोमप्रकारोयं सर्वविघ्नतपोहयेत ६१
यथास्यात्तं प्रवक्ष्यामि सर्वविघ्ननिहत्तये श्री
निवालसवायव्यशिवकोणेषु मंत्रवित् ६२
त्रिकोणवृत्तभूविंवमंडलानि समालिखेत्
मंडलानि चचत्वारि तत्र पात्राणि संक्षिपेत् ६३
वटुकायनमोस्त्वेते गते गणपतिं तथा श्री
योसविरूपंचैव योगिनीभ्यो नमः स्मरेत् ६४
मेवंशाचानघः प्रोतेन ततः सर्वोपचारतः स
हितं च वलिं गृहाण गृह्ल स्वाहा मनुः प्रिये
तमंतेते त्रपालाय नमो मंत्रचतुष्टयम् ए
वमंत्रैर्वेदसंख्यैर्मंडलानि प्रपूजयेत् एवे
ह्रिदेवीपुत्रांते वटुकोतेचनाथच कपि
लो तेजटाभास्वरांते विनेत्रच ६६ ज्वाला
मुखतततः सर्वविघ्नान्नाशयनाशय सर्वो
पचारसहितं वलिं गृह्णपदद्वयम् ६७

द· स·
१३

चक्रिजायाश्चिनो मन्त्रो वटुकस्य उदाहृतः ॥
ईं ब्रह्मोउनोवान्ते दिव्यं ते गगनेतिच १९
तले भूपदमालिख्य तलेचैव तु निष्कले
वापाताले तले वान्ते सलिलान्ते च वा लिखेत्
पवनान्ते च योर्ये च क्रान्ते च स्थिता इति वा
क्षेत्रे चैव पीठाय पीठादिषु च संलिखेत् २०
ततः कृतपदा भूपदीपादि तु पदं लिखेत्
केन प्रीताश्च देव्यश्च सदा नः शुभं संलिखेत् २१
वलिं ते विधिना चैव पातु देवेन्द्रं संलिखेत् वं
शाश्चयाम सन्तुष्टा यार्थ्य योगिनीभ्यो ग्निवलभा २२
सर्वान्ते योगिनीनां च कवचान्तां ग्निवलभा
योगिनीनामधेय मन्त्रः क्षेत्रपालमन्तुश्रृणु २३
षड्दीर्घस्वरभेदेन तत्कारं भेदयेत्प्रिये क
वचस्यानशाह्यन्ते क्षेत्रपालस्य मालिखेत्
भूपदीपादि विहितं वलिं गृह्ण द्विधा लिखेत्
सर्वान्कामान्पूरया ग्निवलभान्ते त्रयो मन्त्रः २५
गां गीं गूं सस्मा लिख्य गणपान्ते ततो लिखेत्
वरशा हृं ह्वि धान्ते ततः सर्वजनं पदम् २६
मेवशं चानयः मान्ते ततः सर्वोपचारतः स
हितं च वलिं गृह्ण गृह्ण स्वाहा मन्त्रः प्रिये २७

गणेशस्य वर्गाणेह मंत्रैरेभिर्बलिं हरेत् ब
टुकस्य तत्तर्जन्या सहांगुष्ठेन वा प्रिये ७९
वामांगुष्ठानामिकाभ्यां क्षेत्रपालस्य कथ्यते
तर्जनी केवला चाथ गणेशस्य तु मध्यमा
जगवक्त्राकृतिर्देवि योगिनीनां तु कथ्यते
तर्जनीमध्यमानामयोन्याकारेण योजयेत्
बलिदानविधौ मंत्री मुद्रां संदर्शयेत् क्रमात् ८०
स्तुत्वा नत्वा पुनर्देवीं देवीमात्मनि योजयेत्
आत्मविद्याशिवैस्तत्वैर्गुरुसंतोष्य देवताम्
आनंदसहितो मंत्री सर्वकर्माणि साधयेत् ८१
इति श्रीत्रिपुरासमाराधनविधिः ईश्वर उवाच
महासिंहासनगता विधेयं त्रिपुरेश्वरी पू
र्वाम्नायेश्वरी वर्षा विद्येयं परमेश्वरि १ शि
वचंद्राग्निवामालि विंदुनादमयं प्रिये शा
क्तिः कलाभ्यां मंतेव तुर्यबीजमुदाहृतम् २
श्रीबीजं कुरु तार्तीयं विद्या वेदात्तरी भवेत्
उन्मनी नाम विद्येयं पूर्वाम्नायाधिदेवता ३
अनया विद्यया देवि देवी संमानिता प्रिये
पूर्वसिंहासनगता भोगमोक्षफलप्रदा
मयैषा पूर्ववक्त्रेण जप्यते यापि संदवि ४

द॰म॰
१४

14

तिश्रीदक्षिणामूर्तिसंहितायांपूर्वोत्रायणसिंह
सनविद्यावर्णनेनामनवमःपटलः ९ ईश्व
रउवाच दक्षिणास्येन देवेशि ललितात्रिपुराप्र
ाकामेश्वरीरक्तनेत्रामयायापिप्रजप्यते १ श
क्तिवीजंवाग्भवंतत्कामराजंतत्पूर्ववत् अंत्ये
शिवसमायुक्तेत्रिपुरापरमेश्वरी इयंतुल
लितादेवीमहासौभाग्यवर्धिनी न्यासपू
जादिकंसर्वंत्रिपुरेशीवनान्यथा २ ध्यान
मस्याःप्रवक्ष्यामिसाधकानांतुसिद्धये ३ उद्य
त्सूर्यसहस्राभांमाणिक्यमुकुटोज्वलां ४
रत्नकुंडलमुक्तालीपदकांगदभूषिताम् २
त्नमंजीरसुभगांरक्तवस्त्रानुलेपनां ५ पा
शांकुशौपुस्तकंचदधतीमक्षमालिकाम् ६
सर्वांगसुंदरीध्यायेत्सर्वसंपत्तिहेतवे ७
इतिललितापूजाविधिः ८ ईश्वरउवाच
केवलंकामवीजंतुकामेशीवीजमुच्यते ऋ
षिःकामोस्यमंत्रस्यगायत्रंछंदउच्यते १
कामेश्वरीदेवतास्यात्कर्तृयंवीजशक्तिके
पृथ्वीवीजंकीलकंमहावश्यकरीपरा २
षड्दीर्घस्वरभेदेनषडंगानिप्रविन्यसेत्

पूर्वोक्तपंचबाणांश्च पूर्ववद्विन्यसेत्प्रिये ६
जपाकुसुमसंकाशां धनुर्बाणधरां स्मरेत्
नानालंकारसुभगां मोहयंतीं जगत्त्रयम् ५
अर्कलक्षं जपेन्मंत्रं वंधूककुसुमैर्हुनेत्
तद्दशांशेन देवेशि पुरश्चारी ततो भवेत्
अथ यंत्रं प्रवक्ष्यामि त्रैलोक्याकर्षणक्षमम्
त्रिकोणं चाष्टपत्रं च ततो भूबिंबमालिखेत् ६
मध्ये विदर्भितं बीजं साध्यसाधकलांछितं
कोणत्रयाग्रे विद्यां च पृथगष्टदलेषु च ७
दलाग्रेषु च संलिख्य चतुरस्रेष्टधा लिखेत्
त्रैलोक्यमोहनं यंत्रं विष्णुलोकेषु दुर्लभम् ८
मध्ये पुष्पं विनिक्षिप्य ततः पीठार्चनं चरेत्
मोहिनी लोभिणी चैव वशिनी स्तंभिनी तथा
आकर्षिणी द्राविणी च तथैवाह्लादिनी परा
क्लिन्ना च क्लेदिनी चैव दिक्षु मध्ये तु पूजयेत् ९
ततः सिंहासने पश्चाद्देवीमावाहयेत्प्रिये उ
पचारैः समाराध्य गुह्यमुद्रां प्रदर्शयेत् १०
अग्नीशासुरवायव्यमध्यदिक्ष्वंगपूजनं त्रि
पुरेशी च वर्णानामर्चनेयं परमेश्वरि ११
आद्यावनंगरूपा च अनंगमदना तथा अ

नैरृतमध्ये चैव अनंगकुसुमां प्रिये १३
पंचमी च यजेत्तत्र हृदि अनंगकुसुमातुरा अनं
गशिशिरां चैव तथा चानंगमेखला १४
अनंगदीपिका मध्ये दलेषु क्रमतो यजेत्
इंद्रादयश्च संपूज्या भुवनाराधयेच्छिवा १५
इति श्रीदक्षिणामूर्त्तिसंहितायां कामेश्वरी
पूजाविधिर्नाम दशमः पटलः १० ईश्वर उवाच
रक्तेनेशां प्रवक्ष्यामि सर्वकामफलप्रदाम्
त्रिपुरेशीं समालिख्य वाग्भवेशाशिमंडिता १
जीवाग्निमंडिता कामबीजे वाथ क्रमांतके २
रक्तेनेशा महाविद्या विद्या च त्रिपुरेश्वरी ललि
तावदिमां ध्यायेल्ललितां तकुमारिका ३ यं
नवयौवनशोभाढ्या पीनोन्नतघनस्तनी नितंबि
नीलामममध्यापांतरक्तसुलोचना पूजामा
सादिकं सर्वं त्रिपुरेशीव सुंदरि ४ इति रक्ते
नेशापूजाविधिः इति श्रीदक्षिणामूर्त्तिसंहि
तायां दक्षिणसिंहासनविधिरेकादशमः प
टलः ११ ईश्वर उवाच अथ वक्ष्ये महादेवि द
क्षिणाम्नायदेवतान् पेमुक्ताव ततः क्लिंमे
कामबीजं ततो लिखेत् १ मदद्रवे कुलेचो

क्लौं त्रिपुरेशपासने प्रिये वह्निमद्वद्ववर्णाय
दक्षिणाम्नायदेवताम् २ भोगिनीनाम विद्ये
यं त्रिषु लोकेषु विश्रुता अनया विद्यया देवि
देवाः सम्मानितास्त्वयः १ ध्यानपूजादिके
सर्वं बालावत्समुदाहृतम् इति श्रीभोगिनी
विद्याविधिः ईश्वर उवाच देवि पश्चिमवक्त्रे
णामयाया पि प्रजप्यते विद्याचतुष्टयं सा
ज्ञाद स्तानंदविग्रहम् महासिंहासनगा
तां तत्र संजीवनीं शृणु शक्तिवीजं समालि
ख्य शिवचंद्रौ समालिखेत् २ अनुस्वारविसर्गा
भ्यां मंत्रितो क्रमतः प्रिये संजीवनि वज्रे जी
वप्राणांश्चयिस्समालिखेत १ कुरुशाहृमग्रः
संजीवक्लिंजायालितोमनुः विशापणो ऋषिः
शुक्रो गायत्रं छंद उच्यते संजीवनी देवतास्या
श्छक्तिरंमादिवीजकम् तृतीयं च चतुष्कं च
द्वितीयं पंचकं तथा चतुर्दिक्षु चक्रमतः स
र्वांगानि प्रविन्यसेत् भूर्जे लीरेण विलिखे
त्षट्कोणमंडले सुधीः कर्पूराभां हार
मुक्ताभूषणैर्भूषितां परां ज्ञानमुद्रालसा
लां वरदयनीं चिंतयेत् परां एवं ध्यात्वा वा स्वम

दे·सं·
२९
16

ध्येपूजयेदुपचारकैः आद्यावेगानिसंपूज्य
षट्कोणेषु च पूजयेत् संजीवनीं तथा बु
द्धि पूर्वसंजीवनी ततः अहंकारमयीं तद्व
त्सत्वसंजीविनी प्रिये सर्वसंजीविनी चैव
राजसंजीनी क्रमात् शक्तिबीजेन देवेशि
ङे·नमोन्ताः प्रपूजयेत् वर्णलतेजपत्रे
षरस्वरणद्वैतवे तद्ग्राशेनजयाद्वीत्रि
मधुराग्निताः इति मायारणी पूजाविशेष
कृणु पार्वति इति पूजां पुरा कृत्वा बसदाव
रणं स्मृणु प्राणापानं तथा व्यानमुदानं च स
मानकं अग्निकोणेतत्त्वेव वितं तत्र च तथाय
ने च सखिरं चैव ईशद्वित्तीये कोणके यजे
त् पृथिव्यस्तेज आप्यो नेवा स्याकाशोत्तृतीय
के शब्दस्पर्शश्च रूपं च रसगन्धौ चतुर्थके
इच्छा ज्ञाना क्रिया चैव परामाया च पंचमे भू
र्भुवः स्वस्तपः सत्यं षष्ठकोणे क्रमाद्यजेत् स
र्वस्मिन्नेव दद्देविद्वित्वः संजीविनी पदम् त्रि
धाः संजीवनीं पूजामस्तु संजीविनी तथा इ
ति संजीविनी पूजाविधिः ईश्वर उवाच अ
थवक्ष्ये महेशानि मन्त्रं जपपरापरां वद

ह्रंह्रंवादिनीतिवाङ्मुख्येनिलिपेत्त्रिये १ स
ह्स्त्वान्भवेदेविक्लिन्नेक्लेदिनिचालिखेत्
महात्तोभक्रूह्रंह्रंशिववंद्रकलानलात्
वामालिविंदुनादांकांस्नारवीजंततोवदेत्
मोत्तंक्रुह्रघुगंह्रंमः शाक्रस्वरविसर्गमत् २
ह्रयंसंजीविनीदेविक्लरुषिरस्यासितस्त्रिये ग्रा
पत्रेह्नंदन्त्राव्योनेदेवतेयंतभैरवी ४ आ
दिकूटंभवेद्दीजंमध्यकूटंतकीलकं अय
कूटंभवेच्छक्तिः मातानष्टविनाशिनी ५
नवशाक्तापूर्वोक्तैस्त्रन्यसेह्रदिशिरः शिखो
क्रमेणानेनचोत्थाप्यपुनरस्त्रत्रयंन्यसेत् ६
अथत्रिकोणमालिख्यततःषट्कोणमालिखे
त् वहिरष्टदलंपद्मंचतुरस्त्रंचसेलिखेत् ७
वसुपत्रेकामपीठंषट्कोणेजालपीठकम्
ओड्डियानंत्रिकोणेतुविद्याभागत्रयेणतु ८
ध्यात्वावाहयेद्देवींकदंबवनमध्यगां पु
स्तकंवामहस्तेचदक्षिणेचाक्षमालिकां ९
विभ्रतींकुंदधवलांकुमारींचिंतयेत्त्यरात्
सर्वोपचारैःसंतर्प्यषडंगावरणैर्यजेत् १०
वसंतंमदनंचेंद्रंविद्याभागत्रयेणतु त्रिको

दे॰म॰
१७

णे पूजयेत्संजीं प्रादक्षिण्येन वा ततः ब्रह्म
विष्णीशशाह्वान्ते यजेत्संजीविनीत्रयम् इति
संजीविनी षट्के त्रिकोणे पूजयेत्सुधीः १२
धर्मार्थकाममोक्षान्ते जप्त्वा ते विज्ञपातिके सं
जीविनी पदे चोक्ता षट्कोणे पूजयेत् १३
अष्टकोणे तु मातृणां कुर्यात्संजीविनीपदम्
अनेन विधिना विद्वान्पूजयेद्दशपत्रके १४
निर्याज्यलोकपालान्ते पदं संजीविनीति च
क्रमेणानेन देवेशि पूजयेच्चतुरस्रके १५
तारबीजं शक्तिबीजं श्रीबीजं वादिमं क्रम
इति त्रयाणां महेशानि पुरश्चार्थप्रदा भवेत् १६
पुनश्चाराधयेद्देवीं गन्धपुष्पादिभिः प्रिये पु
रश्चरणरीतिस्तु एवं संजीविनीविधिः १७
इति श्रीभैरवीसंजीविनीविधिः ईश्वर उवाच
परां क्लिन्ने वाग्भवं वकरामात्मकमतः परम्
ततो नित्यमदद्रवे मायां च संलिखेत् १
वज्रेशीरविवर्णायं ऋषिर्ब्रह्मास्य सन्मनोः
छन्दो विराट् च वज्रेशी देवता परिकीर्तिता २
पंचपंच चतुर्थं च बीजशक्ती क्रमेण तु ताम्री
यं कीलकं देव्यास्तेनाङ्गानि प्रविन्यसेत् ३

अयंतवीजंसंपूज्य ह्रिकंचैकंचतूपकम्
ह्रिकंह्रिकंह्रिकंदविप्रउँगानिप्रविन्यसेत्
हृतेकृत्वामनोरम्यंकर्णिकाष्टकशोभितम्
कामवीजेनतन्मध्येमहासिंहासनंयजेत् ५
रविपत्रविशोभाढ्यंतत्रविद्यांसमालिखेत्
चतुरस्रंततःकृत्वामध्येपुष्पंविनिःक्षिपेत्
ध्यात्वाचावाहयेद्देवींकदंववनमध्यगा ६
क्रोंचंद्रकलाचारुमुकुटोवरभूषणाम् ७
महातारुण्यपगर्वाढ्यांलोचनत्रयभूषिताम्
शोणिताक्षितरत्यातमहायंत्रोपरिस्थिता
दाडिमीसापकैश्चैवपाशंचैववरेणितथा वा
पंकलापंदधतीशोणमालानुलेपनाम् ८
स्मेरइत्वभगंदेवीमुपचारैःसमर्चयेत् आदा
वंगानिसंपूज्यरविपत्रेप्रपूजयेत् ९ ह्ले
खेक्लेदिनीनन्दालोभिणीमदनातुराम् नि
रंजनीरागवतीक्लिन्नांचमदनावतीम् १०
खेचरीद्राविणीचैवक्रमाद्देगवतींयजेत्
कामवीजेनसंपूज्यसंप्रदायांतरंस्मृतम् वि
रव्यभूमिर्विबंहित्रष्टपत्रंसमालिखेत् मा
तरस्तत्रसंपूज्याभूविवेलोकपालकान् ११

द·स·
९

18

पुनर्देवीं समभ्यर्च्य वर्णलक्षं जपेत् सुधीः त
दशांशेन जुहुयाद् बुजैरक्तसत्रिभिः ४ इ
ति वज्रेशी पूजाविधिः ईश्वर उवाच अथ व
क्ष्ये महेशानि भैरवीं त्रिपुरां पराम् पंचमुद्रा
समासीनां मुण्डमालाविभूषिताम् १ आता
म्राकां पुताभासां रत्नभूषणभूषिताम् पा
शांकुशाभयवरां मालाडुवनमाल्काम् २
हंसासंबा गर्भवेवक्रिवचंद्रकलापराम् त्रि
पुरेशी शक्तिवीजं शिवाद्ये भैरवीमनुः ३
सर्वमस्या विधानं तु त्रिपुरेशीवविद्धिहिः
अनया सदृशी विद्या त्रिषु लोकेषु दुर्लभा ४
इति त्रिपुराभैरवीपूजाविधिः ईश्वर उवाच
एतत्तत्वहृदये देवि पश्चिमाम्नायसागरे वा
ग्भवं शक्तिवीजं च श्रीवीजं हसफानलम् १
रुद्रस्वरेण संमेयं विंदुनादांकितं हसौः प
नंतसंपुटितां विद्यां द्वात्रिंशार्णां लिखेद् बुधः २
नमो भगवति प्रातेचतुर्थ्यं प्रणवे लिखेत् ई
श्वरात्मिक्रमेणैव कुब्जिकायै पदं ततः ह्रीं
मात्मकं पदं पश्चाद् कुमात्मकमतः परम् अघोरे
घोरे पश्चादघोरमुखि संलिखेत् ४ ::

ह्रीं ह्रीं किणि युगं विच्चे कुब्जिका सांभवी परा
पश्चिमाम्नाय देवेशि भोग मोक्ष प्रदायिनी ५
महासिंहासनाख्येन कथितं यच्च तत्त्वयम्
अनया विद्यया योगी सम्यक्तमानिता सदा ६
इति श्री दक्षिणामूर्त्ति संहितायां पश्चिमाम्नाय
सिंहासन विद्या विवरणं नाम द्वादशः पटलः १२
ईश्वर उवाच उत्तराख्येन देवेशि समयापि प्र
जप्यते महासिंहासनगता भैरवी डामरीश्वरी
१ पूर्वोक्त भैरवी देव्याः कामकूटे परे शिवे हि
बोद्धरेत् तदा विद्या महासिंहासनेश्वरी २ उत्तरा
म्नाय विद्येयं शी भोग मोक्ष फलप्रदा वंधूक कु
सुम प्रीतां वंधूक कुसुमार्चिताम् ३ वंधूक कु
सुमाभासां पंचमुंडाधिवासिनीम् स्फुरच्चंद्र
कलारत्न मुकुटां मुंडमालिनीम् ४ त्रिनेत्रां
रक्तवसनां पीनोन्नत घनस्तनीम् पुस्तकं पा
शमालां च वरदं चाभयं क्रमात् ५ दधतीं सं
स्मरेन्नित्यमुत्तराम्नायमानिताम् मदनातु
फरेमात्मम हाचंडे समालिंगित् ६ योगेश्व
राख्य तिपुत्ता विद्येयं कालिकामता नवाल
री महेशानि स्मरेत् उत्तर नायिका अनयावि

द.स.
५५

यथादेविसम्यक्संमानितामवेत् ध्यात्वा सपू
ज्यादिकं सर्वं त्रिपुरेश्वीवसुंदरि महासंप
त्प्रदादेविमहाभयविनाशिनी ४ इतिश्री
दक्षिणामूर्त्तिसंहितायां पुन्नराम्नायसिंहास
नेश्वरीडामरेश्वरीभैरवीविधानंनामत्रयोदशः
पटलः १३ ईश्वरउवाच चतुःसिंहासनेष्वाद्या
भैरव्याःपरमेश्वरि वाग्भवंसर्वसाम्राज्यदापि
ध्यामध्यमंलिखेत् १ दक्षिणाम्नायरुद्राणीस
र्वांगंचसमालिखेत् चैतन्यभैरवीध्यायेत्पाशा
कुशाकपालिकाम् २ रक्तमुंडस्रजांचैवपंच
प्रेतासनस्थिताम् कामेश्वरीचसंपूज्यपूर्वसिं
हासनाश्रयाम् ३ इतिचैतन्यभैरवीविधिः ई
श्वरउवाच उत्थामादनेजीवःशिवएवत्रिधालि
खेत् अर्केन्दूर्वैन्दुकलयाक्रमात्तत्रिंडितंकुरु
विंदुनादात्मकंचाद्यंयुग्मसंस्थविसर्गवत् ध्या
नेत्रिभुवनेश्वर्याभैरव्याइवसुंदरि षट्कूट
भैरवीदेवीदक्षिणाम्नायसेविता त्रिकोणंचै
वषट्कोणंवसुपत्रंदलमात्मकम् ४ अस्या
दित्रिपुरेशीवपूजाचैवनिग
द्यते ॥

त्रिकोणे क्रमतो देवि रतिप्रीतिमनोभवाः ७
डाकिनी शाकिनी चैव लाकिनी काकिनी तथा
राकिनी हाकिनी चैव षट्कोणेषु यजेत् क्रमा
त् ८ अष्टपत्रेषु देवेशि तथानंगादिपूजनम्
मातरो भैरवः सार्धं तथा पीठादिभैरवाः ९ इन्द्रा
दयश्च संपूज्या दलिणाम्नायमानिता इति षट्
कूटभैरवी विधिः ईश्वर उवाच षट्कूटभै
रवी वर्णोत्सहारक्रमतो लिखेत् तथा संयो
ज्य नित्येयं भैरवी भयहारिणी ११ षट्कूट
भैरवी यन्त्र विधान पूजनादिकम् पश्चिमा
म्नायसामर्थ्याज्जवितेधीमरीश्वरी १२ अनयास
दृशी विद्या त्रिषु लोकेषु दुर्लभा इति निस्पाभै
रवी विधिः ईश्वर उवाच ग्रामेश्वरभैरव्या
कादिहित्वा स्वरेश्वरि बिन्दुनादकलाक्रान्तश
क्तिवीजं समुच्चरेत् भयविध्वंसिनी नाम भैर
वी परिकीर्तिता उत्तराम्नाय गंभीरा डामरे
शीच पूजयेत् १५ इति भयविध्वंसिनी विधिः
ईश्वर उवाच हसां स्वान्तेफरेमात्मवीजं संलि
ख्यं मत्रवित् भयविध्वंसिनी नाम भैरव्याद्रू
पमालिखेत् १६ मध्यमेवातिमेचैव त्रिबिधेयं

द·सं
२·

20

भोगमोक्षदा अघोरभैरवीदेवीश्यामामुंड
मालाकुला १७ दक्षिणोत्तरयोः प्रोक्ता पंच
मुंडाधिवासिनी पुस्तकं चाक्षमालां च पाशं
चैवांकुशं तथा १८ खड्गं डमरुकं चैव कपा
लं शूलमेव च दधती परमेशानी षट्कूटा
भिव पूजयेत् १९ इति घोरभैरवीविधिः ईश्व
र उवाच ततः सितासनसमासीनां पंचैव रवीय
यजेत् भयविध्वंसिनीनाम भैरवी पूर्वमालि
खित् २० आद्ये द्वितीये देवे शिवशक्तिवीसमास
नम् स्वयं संपत्प्रदानाम त्रिषुलोकेषु दुर्लभा
ततः षष्टिमहाकोटियोगिनीशासनोत्तमा अ
ताम्रार्कसहस्राभां चंद्रमंडलमस्तकी २२ व
द्धविडस्फुरद्दंतमुकुटोल्लासमध्यमा विनि
विनीस्फुरद्रत्नवसनां रक्तभूषणाम् उन्मत्त
यौवनप्रोद्धापीनोन्नतस्तनशालिनीम् अस्रकं
कोष्ठा मुंडस्रक मंडितांगी सुभूषणा २४ पु
स्तकं चाभयं वामे दक्षिणे चाक्षमालिका वरं दध
ती पूज्या त्रिपुरेशी च नामतः २५ इति दक्षिणामू
र्त्तिसहिता घोरभैरवीवर्णनं नाम चतुर्दशः पटलः
२४ ईश्वर उवाच अथ ध्यानेन वक्ष्ये ण मया याविश
जप्ते विद्या तां पंचवक्त्रदे त्रिषु लोकेषु दुर्लभा १
वाग्भवं शिवमस्तुकं वाग्भवं मध्यमस्मृतम् ॥

२१

हकलान्ते महेशानि शिववीजद्वयं लिखेत् २
रेफवामाक्षि विन्द्विन्दु घटिते न तृतीयके ह
सान्तु ग्रहस गौर्यं विधेका सुंदरी प्रिये ३ अ
हसान्मोजेन्द्रेन्मवीर विन्दूर्यमनु स्वरैः अन्त्यंस
सर्गमायेन्दु विन्दु नादकलात्मके ४ इयं द्वि
तीया देवेशि सुंदरी परिकीर्तिता केवलं वा
ग्भवे देवि वाग्भवे मध्यमे स्मृता ५ हसरा
हसहस्रां सु वाग्भवेन वियोजयेत् हत्रये
कलहले वा शक्तिकूटे स्मृता प्रिये ६ वल
ह्के शिववीजानां रेफात्तु यहसर्गमत् इयं
तृतीया देवेशि सुंदरी च नरलता ७ कलाते
शिवयुग्मं तु तथा वीजद्वये शिवम् परया
पिंडितं कुर्यात् कूटमेतत् त्रिधा प्रिये ८ वाग्भ
वे कामवीजे च शक्तिवीजे च संलिखेत् च
तुर्थी सुंदरी ख्याता भोगमोक्षप्रदायिनी ९
जीवः शिवयुगे जीवः स्मात्लकार शिवेन्दुमत्
एतदाद्यं च मध्यं च हसयुग्मात्त मेन्दुमत् १०
अन्त्यं तु हसलक्षेन्दु हेन्दाकाश विभूषिते
त्रिपुरे पञ्चमी नोरवो पंचमी सुंदरी स्मृता ११
संपत्प्रदा भैरवी च ध्यायेन्मचकसमन्तम १२

ध्यादिपूजाविजेयात्रिपुरेशीचनान्यथा ११२
तिश्रीदक्षिणामूर्तिसंहितायांसुंदरीपूजनं
नामपंचदशः पटलः १५ ईश्वरउवाच अथव
क्ष्येमहेशानिविद्याकल्पलताप्रिये यासांवि
ज्ञानमात्रेणपलायंतेमहापदः १ श्रीविद्यापारि
जातेशीपंचकामेश्वरीतथा पंचबाणेश्वरीदेवी
कुमारीपंचकीर्तिताः २ संपत्प्रदायाभैरव्यावा
ग्भवंबीजमालिखेत् तारेणपरयादेविसंपु
टीकृतमंत्रवित् ३ सरस्वतीहृदंतोयंरुद्रार्णो
मंत्ररीरितः ऋषिःस्याद्दक्षिणामूर्तिर्गायत्रीछं
दउच्यते ४ पारिजातेश्वरीवाणीदेवतापरि
कीर्तिता द्वितीयवत्तृतीयंचबीजशक्तीचतार
कं ५ कीलकंचमहेशानिमहासारस्वतप्रद
म् षड्दीर्घस्वरसंभिन्नबीजेनांगानिसंन्यसे
त् ६ ब्रह्मरंध्रेभ्रुवोर्मध्येनेत्रश्रोत्रपुटेक्रमा
त् नासारंध्रमुखेजिह्वालिंगपायुषुविन्यसे
त् ७ वर्णान्वितास्यदेवेशीध्यायेत्सारस्वतप्र
दां हंसारूढांलसन्मौक्तिकाधवलांशुभ्रवाससं
८ सुविस्मितांचंद्रमौलिंवज्रमुक्ताविभूषणां
विद्यांवीणामक्षधाकुंभमत्तमालांचविभ्रतीं ९

एवं ध्यात्वा जपेन्मंत्रं रविलक्षं समाहितः अ
नेत्सहस्रदशांकेक्षितपद्मैः प्रसन्नधीः ९
अथवा देवदेवेशि जुहुयात्मागपंचकैः
मातृकावलिवियंत्रपीठे तद्वत्प्रपूजयेत्
तत्र वाणीं समावाह्य पूजयेदुपचारकैः आ
दावंगानि संपूज्य परिवारान्समर्चयेत् ९
पार्श्वयोर्देवतायास्तु संस्कृतौ पूजयेत् प्र
ज्ञामेधास्मृतिः शक्तिः स्फूर्तिर्वागीश्वरीति
स्रमतिस्वस्तिरित्येता वसुपत्रेषु पूजयेत्
श्चातरस्तु दलाग्रेषु संपूज्या परमेश्वरि इन्द्रा
दयश्च भूविवेषु न देवीं समर्चयेत् पारिजा
तेश्वरी विद्या दुर्लभा भुवनत्रये १५ इति पा
रिजातेश्वरीवाणीयजनविधिः ईश्वर उवा
अथ वक्ष्ये महेशानि पंचबाणेश्वरीं शिवे
तैरेव पंचभिर्बाणैर्विद्या पंचाक्षरी भवेत् १६
ऋषिरस्यास्तु मदनो गायत्री छंद उच्यते का
मेश्वरीव बीजानि देवता च यमीश्वरी ७
व्यस्तैः समस्तैरंगानि बाणैः पंचभिरर्चयेत्
पूर्ववत्पंचबाणानां न्यासं कुर्वादि वत्ततः १८
पंचकामांश्च विन्यस्य पूर्ववत्परमेश्वरि ३

द्यदिवाकराभासांनानालंकारभूषिताम् २१
वंधूककुसुमाकाररक्तवस्त्रांगरागिणीम्
इक्षुकोदंडपुष्पेषुविराजितभुजद्वयाम्
एवंध्यात्वाजपेन्मंत्रंवर्णलक्षंसमाहितः त
द्दशांशेनजुहुयाद्वंधूककुसुमैः प्रिये का
मेश्वरीवत्पूजाविशेषाद्वाणपूजनम् त्रि
पुरेशीवत्पूजनम्, त्रिपुरेशीवत्पूजयेमो
हयेज्जगतीमिमाम् २२ इतिपंचवाणेश्वरीय
जनविधिः ईश्वरउवाच अथवक्ष्ये पंचकामना
पिकांविश्वमातरं पूर्वोक्तपंचकामैस्तुपंच
कामेश्वरीभवेत् २३ ऋषिः संमोहनोनामगा
यत्रंछंदउच्यते देवतेयंकाममायंवीजंशक्ते
तकीलकं २४ अन्यमेतेर्यसेन्मंत्रीव्यस्तेश्चे
वसमस्तकैः अंगानिपूर्ववत्कामवाणान्याम
हृयंयजेत् २५ रक्तांरक्तदुकूलांगलेपनांर
क्तभूषणां पाशांकुशौधनुर्वाणान्मस्तकंवा
लिमालिकान् २६ वराभीतिंचदधतीं त्रैलोक्य
वशकारिणीम् अमतत्सर्वपूजनादिपंचवाणे
श्वरीवत् २७ पंचकामैः परिवृताविशेषोयंनिग
द्यते इतिपंचकामेश्वरीयजनविधिः ईश्वरउ·

अथ वक्ष्ये महेशानि कुमारीं विश्वमातरम् का
मेश्वरीं भगवतीं त्रैलोक्याकर्षणक्षमाम् ९
वाग्भवं त्रिपुरेशान्याः क्लिन्नानन्तलिपि त्रयीः
कामशक्तिर्द्वयानन्त्यं विशेषं त्वत्तरी भवेत् १-
त्रिपुरेशी चक्राख्या दिवीजशक्तिक्रमेण तु
प्राप्यते कीलकं सम्यङ्महावश्यकरी प्रिये १०
हिरण्यपाशं डं गानि पंचबाणान्स्वबिम्बमेतत्
पंचकामांश्च बिम्बस्य मूलेन व्यापकं समेतत्
कामेश्वरी महायंत्रमध्ये देवीं प्रपूजयेत् वि
शेषेण तत्र वै बाणस्थानेषु पार्वति ११ पं
च कामान्प्रपूजयेद्रत्यादिविंतये यजेत् त
तोनंगाद्यगायत्र्यष्टकेस्मान्द्रे रवैः सहमातरः १२
अष्टपत्रेषु चाग्रेषु यजेत्सीताष्टके प्रिये १३ ना
दयश्च संपूज्या मध्ये देवीं समर्चयेत् १५ पु
रश्चरणकं संतु त्रिपुरेशीं वसुंदरि पंचाक्ष
रन्महेशानि मोहयेज्जगतीमिमाम् १६ अ
त्यूर्ध्वमहस्ताभां माणिक्यवरभूषणान्
स्फारहस्तकुकूलाद्यां नानालंकारभूषणां
रत्नकोदण्डबाणांश्च पुष्पकं बालिमालिकां
दधतीं चिंतयेन्नित्यं सर्वराजवशंकरीम् १८

१७

द॰मू॰
२३

23

इतिकुमारीयजनविधिः इतिश्रीदक्षिणामू
र्त्तिसंहितायांकल्पलताकथनेनामषोडशः
पटलः १६ देव्युवाच पंचरत्नमहाविद्यास्त्वि
तानप्रकाशिता श्रोतुमिच्छामिदेवेशकृपांकुरु
महेश्वर १ ईश्वरउवाच सिद्धविद्यांप्रवक्ष्यामि
स्मरणेनापिसिद्धिदाम् कामदांमंत्रदांनित्यंस
र्वैश्वर्यप्रदांप्रिये २ श्रीविद्यासिद्धविद्याचमातं
गीभुवनेश्वरी वाराहीतिचसंप्रोक्तापंचरत्नप्र
कीर्तितम् ३ शिवाग्निवामनयनविंदुनादक
लात्मकं श्रीकामपुटगलेवोक्तास्तदंतेभगवत्य
पि च माहेश्वरीवर्णवर्णमंत्रपूर्णंततोलिखे
त् वर्णवर्णंवह्निजायांततोराघोमनुरीरितः ५
हिदशार्णंमहेशानिप्रातरेवसमर्चयेत् अ
स्याःस्मरणमात्रेणपलायंतेमहापदः ६
ऋषिर्ब्रह्मास्यमंत्रस्यउष्णिक्छंदोभिधीयते
अन्नपूर्णेश्वरीसिद्धविद्येयंदेवताप्रिये ७
वीजशक्तीःकीलकंचह्लेंह्लेंवादिकमुच्यते
षड्दीर्घस्वरसंभिन्नह्लेंह्लेंर्वाकुरुपार्वति ८
पभिरंगानिविन्यस्यवर्णन्यासंसमाचरेत्
ब्रह्मरंध्रेचसीमंतेभालेभ्रूमध्ययोर्नसि ९

वक्त्रे कंठे च हृदये कुक्षि नाभि गुह्य लिंगके आ
धारे स्फिक्कु हृदये चोरु द्वये जानुद्वये तथा १०
पादयोर्देवदेवेशि पदन्यासं ततो न्यसेत् न
वद्वारेषु [illegible]ये कुक्षि नाभि गुह्य लिंगके आ
धारे स्फिक्के हृदये चोरु द्वये जानुद्वये देवेशि पद
न्यासं समुदाहृताः ११ मूलेन व्यापकं न्यासं कु
र्याद्देहस्य शुद्धये अथ यंत्रं प्रवक्ष्यामि भोगमो
क्षफलप्रदम् १२ त्रिकोणे षोडशारं च ततोष्ट
दलनीरजं भूबिंबं परमेशानि तारं मध्ये वि
निर्लिखेत् १३ कोणत्रये त्रिबीजानि प्रादक्षिण्ये
न योजयेत् अग्रमारभ्य पूर्वादि कलापत्रेषु
णुप्रिये १४ अवशिष्टान्कलावर्णान्पूर्वादि
क्रमतो लिखेत् अष्टपत्रस्य पत्रेषु लिखेद्दीर्घ
स्वरांप्रिये १५ एतत्पीठं समभ्यर्च्य प्रणवेन
प्रियाबुधः तत्रावाहनदादेवीमुद्रयासाधारणे
यजेत् १६ गंधपुष्पादिभिः सम्यगभ्यर्च्य परि
तो यजेत् अग्नीशासुरवायव्यमध्यदिक्षु गपू
जनम् १७ ध्यात्वा देवीं सिद्धविद्यां महातीर्थे
वै बुधः रत्नद्वीपे लसद्धर्णप्राकारभवनोज्व
ले १८ कल्पद्रुमविशोभाढ्यसिंहासनसमन्विते

उद्यत्सूर्यसमाभासां विचित्रवसनोज्वलां १९
चंद्रचूडामनंदाननिरतां रत्नभूषिताम् सु
वर्णकलशाकारस्तनभारभरोलताम् २०
हृद्गताडवमानंदद्विभुजां परमेश्वरीम् व
रदाभयशोभाढ्यामनंदाननरतां सदा २१ अ
ष्टवादक्षिणेहस्ते देवीं ध्यायेत्सुवर्णजाम् उ
ग्यान्नभरितां पात्रं दिव्यरत्नादिभूषिताम् २२
वामहस्ते महेशानि ध्यात्वेमां परमेश्वरीम् पु
नस्तांडवशोफ्फरुद्रं संपूजयेत्प्रिये २३ द्वि
तीयेन तु बीजेन तृतीयेन हरिं यजेत् ब्रह्मा
णं तुर्यबीजेन कलापत्रं ततो यजेत् २४ श्रादे
नतमरामेत्तदायिनीभयहारिणी शांति
हसीवरालीचतीर्थनूपा ततः परम् २५ मा
नदाहेमदास्वर्णदात्रीरिपुनिकृंतनी अन
घ्यंधसिनी देवी मननानंददायिनी २६ पू
तमूर्तिश्चरणश्रीच स्वामिनीहरसुंदरी शोड
शांतेन सूर्णाये नमस्कारक्रमेण तु २७ वर्ण
देवीसमभ्यर्च्य वसुपत्रे ततो यजेत् ब्राह्म्य
ष्टकेन देवेशि चतुरस्रे ततो यजेत् २८
लोकपालैः पुनर्देवीं गंधपुष्पादिभिर्यजेत्

लक्षंजपेक्रानियमंलदशांशेनहोमयेत्
स्व्वपापसमर्पिभ्योसिद्धिदंभवतिध्रुवम्
इतितेकथितासिद्धविद्यात्रफलदायिनी ९
इतिश्रीदक्षिणामूर्त्तिसंहितायांमत्रप्रणय
जनेनामसप्तदशःपटलः १७ ईश्वरउवाच
अथातःसंप्रवक्ष्यामिमातंगीरत्नदेवताम् वा
ग्भवंकामबीजंचसर्गवान्भृगुरुत्तमे १ अनु
ग्रहेणसंयुक्तःपुनरायपरोलिखेत् श्रीवी
जंतारकंचैवनमोभगवतीतिच २ मातं
गीश्वरिसर्व्वंतेमनोहरिजनादिके सर्वरा
जवशंचानेकरिसर्वत्रलोकके ३ रंजनीति
ततःसर्व्वस्त्रीशब्दंचततोवदेत् पुरुषांतेवशं
वोत्काकर्षतेसर्व्वदुष्टंच ४ मृगांतेवशमा
लिख्यसर्व्वलोकपदंवदेत् ततश्चवशमा
लिख्यकरिशब्दंततोलिखेत् ५ पराप्रियंका
मबीजंवाग्भवंचततोलिखेत् सप्ततिश्चत्रयो
वर्णामातंगीविग्रहास्थिये ६ इयंसमस्तवि
द्यानांराज्ञीमोक्षार्थसिद्धिदा ऋषिर्मतंगोभ
गवान्गायत्रंछंदउच्यते ७ देवतानादमू
र्त्तिस्तुमातंगीपरमेश्वरी कामबीजंवाग्भवंच

द॰ स॰
२५

25

वीजशक्तीचकीलकम् ८ नात्नीयंदेवदेवेशि
षडंगामथविन्यसेत् आद्यवीजत्रयेणैवहृ
राह्वत्याषडंगकम् अंभोजार्पितदत्ताग्निंत्ता
मांध्यायेन्मातंगिनी कणद्वीणालसन्नादस्त्रा
च्चांदोलितकुंडलाम् दंतपंक्तिप्रभारम्याशि
वांसर्वांगसुंदरीम् कदंवपुष्पदामाढ्यांवी
णावादननतत्पराम् ११ श्यामांगींशंखवल
याध्यायेत्सर्वार्थसिद्धये अथयंत्रंप्रवक्ष्यामित्रि
कोणंपंचकोणकम् १२ वसुपत्रंकलापत्र
वसुपत्रंचतुर्दलम् चतुरस्रंचतुर्द्वारमेवंम
ण्डलमालिखेत् १३ आवाह्यदेवतांसम्यगुप
चारैःसमर्चयेत् अग्नेशासुरवायव्यमध्यदि
क्षुगपूजनं १४ अथवक्ष्येमहेशानिचरणत्रय
पूजनम् अग्रद्वाराचतुर्दिक्षुप्रादक्षिण्येनपू
जयेत् सरस्वतींचलक्ष्मींच शंखपद्मनिधी
प्रिये विदिक्षुवामभागादिप्रादक्षिण्येनपूर्वव
त् १५ वटुकंगणराजंचक्षेत्रपालंचयोगिनीः
ततश्चतुर्दलाग्रेषुसिद्धमातंगिनीक्रमात् १
महालक्ष्मीमयींसिद्धलक्ष्मीमातंगिनींयजेत्
महामातंगिनीदेवींप्रादक्षिण्येनपूजयेत् १६

अष्टपत्रे महेशानि त्वसितांगादिभैरवान् अ
सितांगोरुरुश्चंडः क्रोधउन्मत्तभैरवः १९
कपाली भीषणश्चैव संहारश्चाष्टभैरवाः
प्रादक्षिण्येन देवेशि पुरश्चारभ्य पूजयेत् २०
वामाज्येष्ठा च रौद्री च शान्तिः अजा च पंचमी वा
गीश्वरी क्रियाशक्तिर्लक्ष्मीः पुष्टिस्तथैव च २१
मोहिनी प्रमथा श्वासा चीची वै विद्युन्मालिनी सु
रानंदा नागबुद्धिश्चताः षोडशप्रकीर्तिताः २२
पुरश्चारभ्य देवेशि प्रादक्षिण्येन पूजयेत् षो
डशारे ततो देवि लक्ष्मीचैव सरस्वती रतिः
प्रीतिः कीर्तिः शान्तिः तुष्टिः पुष्टिश्च पूर्ववत् प
चाष्टके तु देवेशि मातृणां चाष्टकं यजेत् पू
र्ववसंचपत्रेषु द्राविणी शोषिणी तथा क्षो
भिनी मोहिनी चैव तथा चाकर्षिणी २३
त्रिकोणेपि हि देवेशि यजेद्बाणान् पूर्ववत् प्रा
दक्षिण्येन मन्मथो रतिप्रीतिमनोभवाः २४
पुनः संपूज्य देवेशि सर्वोपस्करकैः प्रिये
पुनश्चरणकार्येषु लक्षत्रयमुदाहृतम् २५
प्रवालमालया देवि दशांशेन तु होमयेत्
वेपूककुसुमैर्मंत्री त्रिकोणे कुंडके शुचिः २६

एवं संपुटमंत्रस्तु सर्वकर्माणि साधयेत् रा
ज्यार्थी मल्लिकाजातीपुन्नागैः श्रीफलच्छदैः १०
श्रीकामस्तु कःशुभ्रपद्मैः पंकजैर्वापि शुभ्रभे उ
त्पलैर्भोगकामस्तु लक्ष्मीपुष्पैश्च सद्व्रते ११
जपाबंधूकबकुलकिंजल्कैर्वशकारिणी व
र्णार्थी मधुसंयुक्तैर्मधूककुसुमैर्जनेत् १२
आकर्षणेतु लवणतिलैस्त्रिमधुसंयुतैः वै
जैलेहंहि कामस्तु धनार्थी हेमपुष्पकैः १३
वश्यकंदबकुसुमै राज्यार्थी धान्यतंडुलैः
साज्यान्नैरन्नकामस्तु वश्यके कुंकुमरोचनैः
गंधद्रव्यैस्तु सौभाग्ये नंद्यावर्तैस्तु वाश्रुये
करिपुष्पैः संपदर्थी पालाशैस्तेजसेऽनेनत्
कापिलेन घृतेनाथ तेजस्वी हवनाद्भवेत् उ
न्मादनकरो होम उन्मत्तकुसुमैर्भवेत् वि
द्वेषे तैश्च निंबैश्च श्मशानकबिभीतकैः उ
लूकगरुडकाकेस्नैनिंबतैलपरिप्लुतैः हो
मयेद्रिपुनाशाय नराश्रवह्निकुंडके यमा
शाभिमुखो नग्नो भूत्वा दृष्टिमलीमसः १४
उच्चाटने वायुभागे विदेशोरत्नसोभवेत्
ऐशाग्नेयविभागे पिशांतिके प्राङ्मुखो भवेत्

पश्चिमे लंभने चोक्तमुत्तरस्यां तु दक्षिकः
साधयेत्सर्वकर्माणि पौष्टिकादीनि साधकः ४०
पायसैर्गुडखंडैश्च कुर्यादिक्षुरसैरपि पि
त्तशांतिकरो होमस्तस्यैकेवलमेव च ४१
उन्मादनाशने चूर्णं पायसं हुतसंयुतं म
रीचतिलतैलाक्तकासश्वासहरं भवेत् ४२
निर्गुंडीमूलहोमेन वातदोषविनाशने
श्लेष्मवधाकर्षणे शीघ्रमाकृतिं चिंतयेत्कुरु ४३
जीवमासेन ततः कृत्वा मृदा वल्मीकहोत्थया
मधूच्छिष्टेन चाप्यापि लवणेनापि पुत्रिका ४४
कृत्वा तन्नाम संकल्प्य मद्रूपां कुंडमेमसेत्
सप्तांगुलमयः पश्चाल्लावणीमेखलागता
लेवयेद्भूर्ज्जतः पश्चाद्धृत्तमात्रिकसंभवात् ल
वणं पेच्यमथुना लावण्या होमयेत्सुधीः आ
रभ्य दक्षिणं पादं वामपादावधि प्रिये मनु
जानामयं होमः स्त्रीणां देवि विपर्ययः ४७
सप्तरात्रान्महादेवि वश्यं भवति विरहातुराः प
तंति साधकस्यांके भयलज्जाविवर्जिताः ४८
लवणं निंबतैलेन होमयेच्छत्रुनाशने ह
रिद्राचूर्णसंयुक्तं लवणं लंभने जनेत ४९

द.स.
३३
२७

पूर्वाह्णे पूर्वरात्रौ च शुभार्थं च यजेत्तु यः
मध्याह्ने मध्यरात्रे तु कुर्यादुच्चाटनादिकं
मातंगीविग्रहो भूत्वा सर्वकर्माणि साधयेत्
आवेशनं ततः कुर्यात् कन्यानां सन्निधः सुधी ५१
कन्यापूजा च कर्तव्या योगिनीनां विशेषतः
अष्टाष्टकं समभ्यर्च्य मातंगीं त्रिकल्पयीः
बलिं निवेदयेत्पश्चान्मातंग्यास्तु वरानने दे
वि शक्ति नमस्यांते भगवत्यपि संलिखेत् ५२
मातंगी च ततो ब्रूयाच्चंडाली च समालिखेत्
ततः सर्वजनं चोक्त्वा मे वशं वश समालिखेत्
आनयेति च संलिख्य वह्निठांता मनुरुच्यते
अनेन बलिदानेन मातंग्याः सिद्धिहेतवे ५५
वटुकादिबलिं तद्वत्सम्यग्गृह्णिण मांत्रिकः
साधयेत्सर्वकर्माणि मातंग्यास्तु प्रसादतः
५६ इति श्रीदक्षिणामूर्तिसंहितायां मातंगीश्व
रीरत्नयजनं नामाष्टादशः पटलः १८ ईश्व
र उवाच शृणु देवि प्रवक्ष्यामि भुवनानंदमंदि
रं यस्य विज्ञानमात्रेण पलायंते महापदः १
शिवं वह्निसमारूढं वामाक्षिपरिभूषितम्
ऋषिः शक्तिर्वसिष्टस्य स तच्छंदोत्र कथ्यते २

गायत्री देवता बोधवाचिसं विकला परा
शिवतूर्ये बीजशक्ती कीलकें रफ उच्यते ३
दक्षात्रिभुवनेशानी ब्रह्मपार्श्वे च तत्पुरुष अ
नेत्र वामनेत्राभ्यां वामकर्णापरेण च ४
अन्तु अहुविसर्गाभ्यां विद्यासंभेदमन्त्रवित्
षडंगानि च विम्बस्य हृल्लेखादिमनुं न्यसेत्
अकारादयणां पर्यन्तं विपरीतक्रमेण च मा
त्कां समहरे म्हढं नं ढुं ढौं विलोमतः ६ गु
रूपदेशविधिना विलोमस्वरमार्गतः सं
हारमातृकान्यासो ब्रह्मानंदरसोज्वलः ७
एवं भूत्वा ततो मंत्री षडंगे रंगुली न्यसेत् ग
नं गानि विम्बस्य चिदानंदेन तेजसा ८ का
म्य हृत्सु पादेषु न्यसेत् च परेश्वरी हृल्ले
खा गगना रक्ता चतुर्थी च करालिका ९
महोत्सुष्का च विम्बस्य तिस्रः शक्तिश्च विन्यसेत्
गायत्री चैव सावित्री त्ततीयां च सरस्वतीम् १०
कंठे वामस्तने दक्षस्तने देवत्रयं ततः ब्र
ह्मा विष्णु शिवाख्ये च वामांशे हृदये तथा ११
दक्षांशे च ततो न्यासं मातृणां विन्यसेत् स्त्रिये
ललाटे न्य वामभागे पार्श्वे कृत्तो वदति ए १२

५

कुंडलौ पार्श्वे च केशांते मूलेन व्यापकं न्यसेत्
पाशांकुशवराभीतिमुद्रा सन्नद्धविग्रहः १३
कुंकुमादिभिरन्यच्च स्वहृद्ये विलिखेत्पटे स
वर्णरौप्यताम्रादिरचिते देशिकोत्तमः १४
इंद्रराक्षसवायव्यरेखाभिर्वह्निमंडले त
न्मध्ये साध्यनामानं केशक्लिं सलिख्य मात्रिकः १५
ठकारवेष्टितं कृत्वा कोणाग्रेषु परालिखेत्
स्वाम्नत्रयेपि वं यस्तु कथ्यते सिद्धिदायकः १६
तद्बीजत्रयरेखाग्रप्रादक्षिण्येन वेष्टयेत् ३
तरचितयेवा स्वमायाग्रेणैव वेष्टयेत् १७
ग्रन्थोन्मकलया रम्या शक्ति वयउदाहृतः
त्रिकोणस्यांतरालेषु वामनेत्रं सविंदुकं १८
प्रत्येक कोणपार्श्वेषु हर्णवर्णं च वह्निरातरं ष
ने रतं द्वयं मध्ये तयोश्च सविसर्गकम् १९
दृत्पर्णे वेष्टयेद्धा हि हते कृत्वा वह्निस्ततः
पद्मविरच्य वस्वस्नके सरस्थानके पुनः २०
हर्षणं च हराणं च लिखेत्प्रति दले सुधीः
तयस्वरं हरं तत्पर्यं टविरिस्पि सलिखेत् २१
दलेषु च दलाग्रेषु वानेत्रं च सलिखेत्
पत्रत्रिगुणितं यंत्रं वह्निरास्वर्णवेष्टितं २२

कामदे मोहदे रम्ये सर्वैश्वर्यप्रवर्तकम् । असि
न्नेसपूजयेत्पीठे शक्तीः सर्वार्थसिद्धये २४ ज
याच विजया चैव अजिता चापराजिताम् नि
त्या विलासिनी दोग्ध्री मघोरा सर्वमंगला २५
अभ्यर्च्य परितः पीठं नेदिने पीठमूलगाम्
ध्यात्वा कुंडलिनीं रूपां स्रुयत्भास्वत्समद्युतिः २६
पाशांकुशावराभीतिचतुर्वाहु त्रिलोचने २७
अभ्यर्च्य परिवाह्य यजेद्देवीमुपचारैर्मनोहरैः
आवाहनादिमुद्रांश्च दर्शयेद्देशिकोत्तमः । अ
ग्नीशासुरवायव्यमध्यादिक्षु गणपूजनम् २८
पूजयेद्देशिकवरो भोगांगे भोगसिद्धये ३
उं ओ गजजवर्णादवललास्तु पार्थिवाः २९
ऋ ॠ डौ खफफावर्णाथ भवाः शाम्भनी रजाः
इ ई ऐ विछ्छदाथश्वफ रत्ना वह्निसंभवाः १
अआपकचटा १ तस्थपयषावायुसंभवाः ल्ट
लृ से ड ञ ण न म सहा नाभसा मताः ३१ उद्दे
ल्टयाम्यसौम्या दिप्रत्यक् दिक्षुप्रपूजयेत् व
र्णान्समाहितो मंत्री ह्येलिखायंततः परं ३२
पंचकं पूजयेत्तेषु स्थानेषु निजसिद्धये प
न्दैने ऋत्यवायव्यकोणेषुक्रमतो यजेत् ३३

गायत्र्या दिक्त्रये पश्चाद्ब्रह्माण्यादित्रयमर्चयेत्
आग्नेयवारुणैशाने दिक्षु पूज्यास्ततः परे
दलेषु मातरः पूज्या लोकपालार्चनं ततः ३
त्रिभुवनेश्वरी त्रिगुणितयंत्रोद्धारः ईश्वर
उवाच अथातः संप्रवक्ष्यामि यंत्रं षट्गुणितं
प्रिये यस्य विज्ञानमात्रेण सर्वसिद्धिश्वरो भवे
दिनिर्मितं पात्रं नारिकेलोद्भवं प्रिये महाशा
विविशेषेण भुक्तिमुक्तिफलप्रदम् ६ नारि
केलोद्भवं पात्रं सर्वैश्वर्यसुखप्रदम् मुक्ति
दं तु विशेषेण सर्वसम्पत्करं सदा ७ गन्धादि
चर्चितं धूपधूपितं पात्रमुत्तमम् यंत्रिकाधा
प्रतिष्ठाप्य पूर्वोक्तं यन्त्रमालिखेत् ८ तथैव
पूजयेत्कामकूटं च स्थापयेत्तदरि स्वर्णपात्र
मयं तत्र विशेषेण च पूजयेत् ९ भागत्रयं
विशेषस्य भागमात्रं जलं क्षिपेत् तत्रापि
संलिखेत्सर्वं यन्त्रपूजां च कारयेत् १० त्रि
कोणे पूजयेद्विद्यां मध्यकोणत्रये ततः कू
टत्रयक्रमेणैव यथाविद्यां तथाविधा ११
श्रीविद्याविषये देवि समष्टेन पूजयेत् स
र्वत्राद्यक्रमो देव्या नानाजालस्य चरेत्प्रिये १२
देवीमूलषडङ्गानि क्रमेण परिपूजयेत् शा
क्तिकूटं समुद्धार्य तज्जलं चन्द्ररूपकम् १२

दे.म.
५८

संहृज्यमथैकमतः मातृकात्मकमाचरेत् पंच
कोशमहाविद्यां संस्मरेन्मंत्रं सुंदरि १४ तार्त्ती
यश्रीगुरोर्बीजं हंसविद्यामंत्रं जपेत् गारत्र
यं च देवेशि श्रीविद्यां समसथा यजेत् १५ षट्
त्र्यंशकं ततो गंधपुष्पाद्यैरर्चयेत्ततः चिदा
नंदमयं यथा मूने ब्रह्मरंध्रगतं स्मरेत् १६ प्रोक्ष
येत्तेन सकलं पूजाद्रव्यांतरं ततः आत्मान
मपि सर्वं तद्विद्यारूपं भवेत्प्रिये १७ अंगु
ष्ठानामिकाभ्यां तु वाममार्गेण सुंदरी तत्व
शुद्धेयमाख्याता महापापनिकृंतनी १८
अंगुष्ठतर्जनीभ्यां तु तानशुद्धेयमीरिता अ
नया पुष्पपूजा स्यात्तथा तर्पणपूजने १९ भू
तशुद्धिविधिं कुर्यात् मंत्री देहस्य शुद्धये वा
युबीजेन देहस्य धातवः पापसंयुताः २०
संशोष्य वह्निबीजेन पापेन सहितं दहेत् पा
पं विनाशु नर्देहं समम्रतीकृत्य जीवयेत् २१
जलबीजेन देवेशि पार्थिवेन स्थिरीकुरु
ततो देहस्य सन्नाहं सम्यग्गात्रं समाचरेत् २२
करशुद्धिविधिं कृत्वा चतुरासनदेवताः पा
दयोर्जंघयोर्जान्वोर्मूलाधारे च विन्यसेत् २३

कनिष्ठांगुष्ठहृन्नेत्रैस्त्रिभिस्त्वत्हृदि विन्यसेत्
मध्यमानामिकाभ्यांतु न्यसेच्छिरसि मंत्रवित् २४
शिखांगुष्ठेन विन्यस्य दशभिः कवचं न्यसेत्
त्रिकूटे नेत्रत्रवि मांस्त्रं विन्यसेत्परमेश्वरि २५
तर्जनीमध्यमाभ्यांतु ततोस्त्रं विन्यसेत्प्रिये
आत्मरक्षाकरीं विद्यां हि रूपार्धं न्यसेद्बुधः २६
व्यापकत्वेन मूर्तित्वं विन्यसेत्सिद्धिहेतवे अ
थ वक्ष्ये महेशानि श्रीविद्यामासमुत्तमं सं
पूर्णां चिंतयेद्विद्यां ब्रह्मरंध्रेण सुप्रभां २७
स्ववक्त्रे यो षोडशार्णां महासौभाग्यदां स्मरेत्
वामांशे दक्षे सौभाग्यदंडिनीं भ्रामयेत्ततः २८
रिपुजिह्वाग्रहां मुद्रां पादमूले विनिक्षिपेत्
त्रैलोक्यस्य त्वहं कर्ता ध्यात्वैवं तिलके न्यसेत् ३०
संपूर्णामेव वदने वेष्टनत्वेन विन्यसेत् पुनः
संपूर्णां वदने गलोर्ध्वं विन्यसेत्तथा ३१ संपू
र्णायां च देहे त्वव्यापकत्वेन विन्यसेत् व्या
पकांते योनिमुद्रामु विलिसाभिवंद्य च ३२
त्रैलोक्यं क्षोभयत्याशु सा समस्तविग्रहः
सृष्टिं वध्वा चरेन्मंत्री तर्जनी दंडवत्तथा ३३
सौभाग्यदंडिनी नाम रिपूंदंडयते क्षणात् अ

सं·टी·
२९

गुह्यस्थलिंगकुर्याद्धृदि षोडशिकाग्रहात्मवेत् ३४
सयोर्मरूढलोदेवेशितर्जन्यानामिकांयजेत
तत्कुण्डाम्बे च संघृष्टयोन्याकारेणयोजयेत् ३५
उपर्युपर्यग्रहृष्टयोगेनयोनिमुद्रेयमीरिता अन
यामुद्रयादेवि त्रैलोक्यंवशमानयेत् ३६
परिभ्राम्यानामिकान्तु मूर्द्धानंपरितःप्रिये
ब्रह्मरंध्रेक्षिपेद्देवि मणिवंधेस्पृशेत्ततः ३७
ललाटेनामिकांकुर्यात्स्वोडुशार्णिस्मरेत्प्रिये
त्रैलोक्यमरुणंध्यायेन्मुद्रासंमोहनाभिधः
पादयोर्जंघयोर्जान्वोःकट्योरंघ्रिपृष्ठके ना
भौपार्श्वपृष्ठयेचैवस्तनयोरंशयोस्तथा ३९
कर्णयोर्ब्रह्मरंध्रेचवदनेध्वनिपावति ततः
कर्णप्रदेशात्करवेष्टनयोःक्रमात् ४० स
हार्णायमहामायासौवीजैःषोडशभिःस्मृतः
गोलकंचततःकुर्यात्त्रैलोक्यक्षोभकारकं ४१
मातृकाविन्यसेत्पश्चाद्गणेशग्रहरूपिणीम्
नक्षत्रयोगिनीराशिपीठवर्णास्वरूपिणीं ४२
सकलाम्नायविद्याभीरंकितांविश्वमातरं
शिरोललाटभ्रूमध्यकंठहृन्नाभिगोचरे ४३
आधारेवरुस्कंधयावद्हस्तपायोर्गिनीमसेत् ४४

क्षिन्यासं ततः कुर्यात्सर्वसिद्धिःप्रदायकं ४४
ब्लूं रं ऐं लिके नेत्रे स्फुर्तिं त्राणे ह्रीं केषु च श्रो
त्रयोः दंतयोर्द्विजिह्वायां चोरस्कूपके ४५
ह्रैं ह्रैं सर्वांगहृदयस्तनकुक्षिषु लिंगके
श्रीविद्यार्णं न्यसेद्देवि मंत्री सर्वसमृद्धये ४६
कामं नासाद्विस्फुर्तिं त्राणं गंडोष्ठेषु वाक्यां तरे ने
त्रयोर्वदने वर्णान्न्यसेत्सौभाग्यदे तवे ४७ के
शीमंते ललाटेषु भ्रूयुगे त्राणं वक्त्रयोः कर
संधिषु साग्रेषु शोडषार्णान्क्रमान्न्यसेत् ४८
शिरोललाटहृत्कंठे जिह्वाग्रे संधिकोटिषु ४९
षोडशार्णान्न्यसेत्कंठे स्वरस्थानेषु वक्रमात्
ललाटगलहृन्नाभिमूलाधारेषु पंचकं ४९
ब्लूं रं ऐं सु विवर्त्ति वीजत्रयमथो न्यसेत्
आधारे हृदये ब्लूं रं ऐं वीजत्रयं ततः ५०
करपादेषु हृदये पंच वीजानि विन्यसेत्
व्यापकं गोलकं कुर्यात्महासौभाग्यदेहतवे ५१
श्रीविद्यां हृदये देवि संपूर्णां विन्यसेत्सुधीः
पंचैरनामयद्यावापि मनसा वा न्यसेद्गणः ५२
एवं विन्यस्तदेहः सन् मुद्राः संचारयेत्क्रमात्
सर्वाकृष्यो निमुद्राद्याः षट्कं विद्धत्रयं क्रमः ५३

सं.दं.
८.
60

ंगुष्ठाभ्यां कनिष्ठाभ्यां मध्यमाभ्यां क्रमेण तु
त्रिविधा नाम मुद्रेयं त्रिपुराह्वानकर्मणि ७४
अनामाभ्यां कनिष्ठाभ्यां मध्यमे रोधयेत्ततः
अंगुष्ठावनिजालग्नौ दण्डवत्तर्जनीद्वयं ७५
क्षोभिणीयं महामुद्रा द्वितीया परिकीर्तिता
द्राविणीयं निगद्यते एतस्या एव मुद्रायाः त
र्जनीमध्यमायुते ७६ अंकुशाकाररूपेण
योजयेत्परमेश्वरि त्रैलोक्याकर्षिणी मुद्रा
तृतीया परिकीर्तिता ७७ पुटाकारौ करौ कु
र्यात्तर्जन्यावंकुशाकृति परिस्पृष्टक्रमेणास
मध्यमे तद्वियोगतः ७८ क्रमेणानेन मनुविक
निष्ठानामिकाद्वयं संयोज्याधः क्षिपेत्सर्वा अ
ंगुष्ठौ चाग्रदेशगौ ७९ सर्ववश्यकरी मुद्रा च
तुर्थी परमेश्वरि संमुखौ तु करौ योज्यौ मध्य
मागर्भगौ तु जे ८१ तर्जनीभ्यां बहिर्युक्ताः
नामे सरले कुरु मध्यमानाविदेशोत्ततस्ता
गुष्ठौ च दण्डवत् ८२ उन्मादिनी नाम मुद्रा
पञ्चमी परिकीर्तिता ८३ एतस्या एव मुद्रा
याः तर्जन्यौ मध्यमान्तर्जे ऊर्ध्वन्यस्तांकुशा
कारौ मुद्रेयं तु महांकुशा ८४ अंकुशाव

महावीजंमत्रंरस्याःप्रकीर्त्तितं वामोद
क्षिणबाहोतुदक्षिणंसव्यहस्तगं ९५
तांकुर्यात्ततोदेविहस्तौसंवेष्टयेत्क्रमात् ९६
कनिष्ठानामिकाद्वेद्वेमध्यमाङ्गुष्ठगेततः
तर्ज्जनीमध्यगंकुर्यात्तुमध्यत्रमध्येसवि अ ९७
ङ्गुष्ठौसरलौकृत्वापार्श्वयोर्योजयेद्द्विमा
त्रिचरीयंमहामुद्रात्रैलोक्यक्षोभकारिणी ९८
विजयायंमहावीजंमत्रंरस्याःप्रकीर्त्तितः
पञ्चाननमयमुद्रेयंसर्वासांपरिकीर्त्तिता
परिस्पृष्टकौद्देवित्वर्थंवद्धाकृतौततः त
र्जनीमाङ्गुष्ठयुगलंयुगपत्कारयेद्दृढं ९९
अधःकनिष्ठावेष्टेतुमध्यमेचतुयोजयेत्
अनामिकेचकुटिलेसर्वाधस्तान्नियोजये
त् १० वीजमुद्रेयमाख्यातामन्त्ररस्याहसौ
मिति पूर्वोक्तयोनिमुद्रातुनवमीपरिकीर्त्ति
ता ११ शक्तिर्द्देस्कुरंततीयंतस्याःसाधारणी
मेवत् वाग्भवंमन्त्ररेतस्यास्ततोविश्वस्यमा
तृका १२ इतिश्रीदक्षिणामूर्त्तिसंहिता
यांयजनसाप्तमुद्राविवरणंनामसप्तविं
शतितमःपटलः २७ ईश्वरउवाच श्रीविं

उत्क्रमश्रीविंदुश्रीपर्णौसभवेपदे चक्रसंख्या
पयेदेविनामत्रपरमेश्वरी । एवंसमस्त
देहःसनव्याप्यब्रह्मांडमंडलम् द्विसंख
प्रतिलाकाशचित्स्वरूपप्रकाशकं २ च
तुरस्रचकोदंडत्रिकोणंतस्माट्सुवं निरा
लवमितिख्यातःमेतत्वैमहमंडलं ३ अ
स्यार्द्धव्यापकंचक्रवाकषट्कपदज्ञेमंत
लीनावाग्वक्तृनिर्देशादपरायोगिभृस्मृता ४
परश्रीसांभवेत्तानैवानस्यसभमध्यमा स
वेजंतृभूपश्यंतीवैखरीज्ञानयोनिषु ५ प
ववाकदंसपन्नेसहस्रदलनीरजम् पत
स्योर्ध्वपरंचक्रंपरपीठमदिरम् ६ चतु
रस्रयष्टपत्रचतुःषष्टिदलशुभम् शतप
त्रसहस्राराशुतारलद्वपत्रकम् ७ कोटिप
त्रस्वशोभाब्दीप्यमानंनभस्तले तत्कं
णिकापीठमध्येसंस्मरेचक्रनायकं ८ म
हाघरधननतस्कंरंतसर्वतोमुखम् घो
रधरूपमधुनाम्श्रणुयोगिभृसंप्रदनम् ९
एतद्वाचकपत्रेषुभुवनान्यविसंस्थितु व
र्णोधामातृकापीठेसर्वमत्रविजृंभिते षट्

शातत्वभरितं चक्रमूलाद्रूपतः १० पंच
सिंहासनोन्नद्धः कलाध्याचक्रशासनः नव
याचक्रभरिता तथा न्यापर्यायपुता ११ षोड
शार्णास्वरूपा च चक्रं व्याप्य विज्ञंभते १२
मत्राद्येति तथा व्योता नीरजायतलोचने
एवं षडध्वसंचारी श्रीचक्रं परिचिंतयेत् १३
कर्णिकायां परं वास्तु ततश्चैतन्यमव्ययम्
ततश्चात्मपरं तत्र स्फुरणं वैंदवं ततः १४
ततः स्वरूपममलं ततः सत्वादिसंभवम्
चैतन्याकोशपीठं च सात्मकांसं चशासनम् १५
स्फुरणावलंभापीठं स्वधापीठं तु वैंदवात्
स्वरूपाद्रत्नपीठं तु तत्वाद्धिंस्वप्रकीर्तितं १६
श्रीविद्यापरमस्थाने चक्रएवोदितः प्रिये स
ह्राकोशेश्वरीं हृदं मंडितासनसंस्थिता १७
सर्वसौभाग्यजननी पादुकां पूजयामि च
इत्युच्चार्य परं ज्योतिः पादुकां पूजयेत्सुधीः १८
अनेनैव प्रकारेण पूजयेत्संचयंचिकाम्
एतत्सर्वात्मकं वस्तु संलीनं परवस्तुनि १९
एतत्सर्वात्मकं वस्तु सर्वसौभाग्यसुंदरी
विंदुत्रयसमायोगात्त्रिविद्यात्रिपुरास्थिता २०

बिंदुं संकल्पयेद्वक्त्रं तस्याधस्तात्कुचद्वयं द
धः सपरार्धं च चिंतयेत्तदधोमुखम् २१ ए
वं कामकलारूपणमात्तद्दत्तररूपिणी बिंदु
त्रयार्धमात्राभिः केवलं विश्वमातृका २२
ततस्मात्कारणाद्देवि विविधाशक्तिरुच्यते अ
स्यास्तां त्रेधरं बिंदुत्रयं नाम्नैव शाश्वते २३
तदिच्छया भवेत्सृष्टिर्लयं यतत्रैव गच्छति
सैव देवी महेशानी स्वात्मानमिति चिंतयेत्
उोजाड्रकामरूपाख्याभापीठोपरिसंस्थिते
तिथिसंख्यफणाहीरमध्यमौलिसरोरुहे
तत्रास्ते वैं देवीपीठतत्त्वस्थाकलाभुजे त
त्कामेश्वरीपीठेनिषण्णांतत्काथयमिणीं २५
श्रीज्ञालोकत्रयेशानीं ब्रह्मविल्वीशशास्ति
नीं अकारादिक्षकारांतवर्णावयवविग्रहीं २०
मूलादिब्रह्मरंध्रांतविसतंतुस्वरूपिणीं ३
यज्ञासूत्रसमाभासांजपाकुसुमसन्निभा २८
सद्यः स्नातसहेमाभां दाडिमीकुसुमोज्वलां
संगंधोद्दामकुसुमपूर्णधम्मिलराजितां
तंतुकैशकसंराजन्नीलभ्रमरकुंतलां भं
गेरवास्फारलुक्तामाणिक्यतिलकोज्वलां ३१

स्फुरद्रत्नावलीरम्यांमुकुटोज्वलकिंकिणीं
श्लक्ष्णकस्फुरद्बिंबवदनांविद्रुमाधरां श
राजच्चंद्रकलास्फूर्तितिलकांचापसंभ्रुवं
कर्णांतविस्फुरन्नेत्रलोलभ्रूक्षेपसुंदरीं ३२
हीरमुक्तावलीराजत्स्वर्णटंकविराजितां
कर्णाभूषणतेजोभिः कपोलस्थलमंजरीं ३३
मुखचंद्रोज्वलच्छक्राकारमौक्तिकनासि
कां स्मितमाधुर्यविजितब्रह्मविद्याधरप्रभां ३४
रक्तोत्पलदलाकारसुकुमारकरांबुजां क
रांबुजनखज्योत्स्नावितानितनभस्थलीं ३५
सुवृत्तनिविडोत्तुंगकुचभारालसांगिकां
नवमुक्तामहाहारपदकोन्नतवक्षसां ३६
शातोदरीं निम्ननाभीं क्षाममध्यमसुंदरीं
अनर्घ्यरत्नघटितमेखलारत्नकिंकिणीं ३७
नितंबबिंबसुभगां रोमराजीविराजितां
रक्तांशुकस्फुरत्तेजोव्याप्तत्रैलोक्यमंडलां ३८
दिव्यकंचुकसंराजद्रत्नचित्रविराजितां क
दलीललितस्थंभसल्लोदरविराजितां ३९
नवरत्नस्फुरत्तेजोमंजीरव्याप्तदेवतां ब
ह्मविष्णुमहेशानस्फुरन्मौलिपदांबुजां ४०

ट·म·
८३

कर्पूरसकलोन्मिश्रतांबूलपूरिताननां प्र
वालवल्लीघटितपाशान्तोमारुणत्विषां ४१
द्वितीयचंद्रलेखांककरुणिमाकर्णिणलंमा
मद्वियाभ्रमरीभूतगुणामिक्षुसरासनां ४२
कमलाकरसंराजत्पंचवाणांश्चबिभ्रतीं
महाम्रगमहोदारकुंकुमारुणविग्रहां ४३
सर्वाभरणशोभाढ्यां सर्वालंकारभूषितां
सर्वदेवमयीं देवीं सर्वमंत्रमयीं परां ४४
सर्वतीर्थमयीं देवीं सर्वशास्त्रमयीं परां स
र्वतीर्थमयीं देवीं सर्वाधारस्वरूपिणीं ४५
सर्वसौभाग्यजननीं सर्वसौभाग्यसुंदरीं ए
वं ध्यायेन्महादेवीं कदंववनमध्यगां ४६
वहन्नाडिपुटद्वारे निर्गतां चिंतयेत्ततः का
मेश्वरपीठवसिताकेस्थापयेत्कलशंदरीं ४७
विद्याकालानरूपिण्या मुद्रयावितयाप्रिये
मुद्राःसंदर्शयेद्विद्वांस्तर्पणं च त्रिधाचरेत् ४८
सर्वोपचारैःसंराध्यमानैसैःप्रकटैःशुभैः
धूपदीपनिवेद्यांतैःपुनर्मुद्राःप्रदर्शयेत्
पुनःस्वतपदेवेशितिथिनिसांवषूजयेत् एत
स्मिन्समये देवि ततत्तिथिमयीं यजेत् ५०

प्रतिपत्सौर्णिमास्यन्ते मेकैकां पूजयेत्तयः ५१
सौभाग्यं लभते मन्त्री महदैश्वर्यमाप्नुयात्
प्रकारादिवृध्या ह्रासा च दर्शान्तं क्रमतो यजेत् ५२
विभाग्य च महाम्नायैः स्वरैः पंचदशात्मकैः
पंचपंचविभेदेन सर्वांसमध्यमे यजेत्
मध्ये देवीं मयी देवि महानित्यां प्रपूजयेत् ५३
कामेश्वर्यादिका नित्या विचित्रान्ताः क्रमाद्य
जेत् विमलाजयिनीमध्ये पूजयेत्कुरुमंडल ५४
परादिव्यादिगुरवः सिद्धादेवि परावराः श्र
परामानवा ज्ञेया मुनिवेदाष्टसंख्यया ५५
श्रानंदनाथशब्दान्ता गुरुषाः परिकीर्तिताः
श्रीकंठाता गुरवो ज्ञेया ह्वीलिंगाय परमेश्वरि ५६
कामराजमयागुरवः कथ्यंते शृणु सुंदरि प
रप्रकाशः संज्ञस्वतंत्रः परशिवो गुरुः ५७
पराशक्तिश्च कौलेशः शुक्लादेवीविकातथा
कुलेश्वरस्तथा देवि कामेश्वर्याम्बिका गुरुः ५८
श्रथभोगस्तथा क्लिन्नः समयसहजस्तथा
गगनो विश्वविमलो मदनो भुवनो गुरुः ५९
लीलाख्यात्मप्रियादेवि क्रमेण परिकीर्तिताः
लोपामुद्रागस्त्ययोश्चपरं पर्यसमो भवेत् ६०

परमाद्यशिवः पश्चात्कामेश्वर्यादिकास्ततः दि
व्यौघाश्च महेशानाश्च सर्वेश्च गुरवः क्रमात् ८१
प्रज्ञादेवीप्रकाशाख्यो वन्नक्षं कथ्यते प्रिये दि
व्यश्चित्रश्चैकेवल्पदेवं वाचमहोदयः ८२ वि
ष्टिश्वशक्तिश्चरकः कमलश्च मनोहरः परस्मा
न्मागुरुं ठंठं विनिर्भोष्टोत्तमानवे ८३ अस्मा
मासर्वविद्यानां समानागुरवः क्रमात् अथो
परमकाशश्च परादिर्विमर्शास्तथा ८४ त
तीयः परमेशानिकामेश्वर्यादिकास्ततः
मोहचामृतसंतश्च पुरुषोत्तोरपवच ८५
अथवा सद्गुरुश्चापि सिद्धौ श्चश्चानर क्रमात्
उद्भवः पर   श्चैव सर्वतः स्वस्थपवच ८६
सिद्धस्तथा च गाविंदशाकरामानवेयकः
श्रोघत्रयावसानेत सगुरुविनंयभवेत् ८७
यदा ह्रादशांसमायाता गुरवस्तत्भवंतिहि मा
नवौघाष्टकांते तु युगं मं सकोचयेत्तदा ८८
गुरुत्रयं तदा योज्यमसद्व्यानष्टं सततिः जा
तां संत्रीतदा देवि पक्कारोहेन भवसंसो ८९
अस्मथा गुरुसंकोचो नकर्तव्यः कदाचन प
रंपर्यविहीनाय ज्ञानभाजेण गविंतः

तेषां समयलोपेन किं कुर्वंति मरीचयः गुरुं
विना क्रमं यस्तु कुरुते परमेश्वरि ११ महा
हानिस्तस्य देवि जायते नात्र संशयः आलि
ङ्गयेण गुरवः संपूज्याः सिद्धिहेतवे गुरुम
न्त्रेण देवेशि निजं संपूजयेद्गुरुम् १२ इ
ति श्रीदक्षिणामूर्तिसंहितायां ध्यानविधि
र्नामाष्टाविंशतितमः पटलः २८ ईश्वर उवाच
अथ वक्ष्ये महेशानि श्रीविद्याक्रममुत्तमम्
अग्नीशासुरवायव्यमध्यदिक्ष्वंगपूजनं १
स्वसमुद्राक्रमेणैव पूजयेन्मन्त्रवित्तमः
भूविंबं षोडशारं च वसुपत्रं क्रमेण तु २
सृष्टिचक्रं भवेदत्र पूजनं कथ्यते प्रिये म
न्वस्रं दशकोणं च बहिस्तीयदशकोणकं ३
स्थितिचक्रं पूजनं च विभेदेन यजेत्तथा ४
अष्टकोणं त्रिकोणं चैव देवं संहृतिर्भवेत्
तृतीयः सकलापूज्यास्त्रतां विसकलं भवेत् ५
तुर्या विद्यास्तु सकलाः पूजयेत्क्रमतः सुधीः
अनेनैव प्रकारेण विद्यावृंदं प्रपूजयेत् ६
श्रीकोशं सिंहासनगतं तथा कल्पलतात्म
कं तथा रत्नात्मकं देवि वत्तरायतनात्मकं ७

·म·ऊ·
९६

दं.सं.
८९

88

चतुरस्रयुगंभीरंसर्वंचपूजयेत्सुधीः त्रैलो
कामोहनेचक्रेपंचाशद्वर्णविग्रहे ८ प्रा
कटास्तत्रसर्वोऽस्मासिद्धयोदशसुंदरि स
घःसतमहेमाभाःपाशांकुशधराप्रिये ९
महाभांडाररत्नानिसर्ववर्णानिवेनिधीन्
प्रयच्छंतःसाधकस्योपद्रहस्ताश्चपूजयेत्
अणिमालघिमासिद्धिर्महिमशित्वरूपिणी
वशित्वसिद्धिप्राकाम्याभुक्तिरिछाष्टमीभवेत्
प्राप्तिसिद्धिसर्वकामासिद्धयःप्रकटायजेत् द्वा
रदक्षिणभागेषुतथाकोणेषुचक्रमात् १२
अथषडर्धक्रमात्प्राप्यपश्चिमाशादिदिशिकेः
ब्राह्मीमाहेश्वरीचैवतथेंद्राणीन्ततीयके १३
कौमारीवैष्णवीचैवषष्ठीवाराहिकाभवेत्
चामुंडाचतथालक्ष्मीःअपरेणचभागतः १४
पाशांकुशधराःसर्वाक्रमेणदयतीस्मरेत् वि
द्याशूलंचवज्रंचशक्तिंचक्रंगदांतथा १५
येर्यांत्रमालिकंपद्मंक्रमेणपरमेश्वरि सर्वा
भरणंसंपन्नांसंस्मरेत्सिद्धिहेतवे १६ सर्वा
घात्रोभिणीचैवद्राविणाकर्षिणीतथा ये
यींत्रमालिकंपद्मक्रमेणपरमेश्वरि १७ स

वीभरणैःसंपन्नांसंस्मरेत्सिद्धिहेतवे सर्वा
ह्याह्लादिनीचैवद्राविण्याकर्षणीतथा १८
वश्योन्मादांकुशाख्याचतथामुद्रावखेचरी
वीजयोनीत्रिखंडाचपूर्वपश्चिमभागतः १९
पद्मरागप्रतीकाशाःसिंदूरतिलकान्विताः
रक्तवस्त्रपरीधानारक्तमालाविभूषिताः २०
स्वस्वमुद्रांकिताःसर्वाःपाशांकुशलसत्कराः
एतासुमुद्राप्रयत्नेनस्वेष्टसंसिद्धिहेतवे २१
पश्चिमादिक्रमेणैवप्रकटाचतुरस्रके स
वीशाएरकेचचक्रेकलास्वरविंदुमंते २२
पश्चिमादिविलोमेनतुमाःसएजयेत्क्रमात्
कामाकर्षिणींनित्यांबुध्याकर्षणिकांतथा
अहंकाराकर्षिणींचशब्दाकर्षणिकांतथा
स्पर्शाकर्षणिकांतद्वद्रूपाकर्षणिकांतथा २३
रसाकर्षणिकांदेविगंधाकर्षणिकांतथा
चित्ताकर्षणिकांतद्वद्धैर्याकर्षणिकांप्रिये २४
नामाकर्षणिकांचैववीजाकर्षणिकांतथा
अमृताकर्षिणींचैवस्मरसाकर्षणिकांप्रिये २५
शरीराकर्षिणींनित्यामात्माकर्षणिकांततः
एतानित्याकलादेविचंद्रमंडलमध्यगा २६

सं.दे.
९९
66

स्वालग्नाःस्मरेन्निंसप्त्रवसीयुष्टवर्षिणीः
पाशांकुशास्तथापूर्णाकाश्मीरच्छटदान्तदा १८
सर्वसंक्षोभणेचक्रेकादिलक्षान्तवर्णिणीः
देवीगुप्ततराख्यावंधूककुसुमप्रियाः १९
पाशांकुशास्फुरल्लीलनीलोत्पलकरास्मरेत
पूर्वादिषुचतुर्दिक्षुकोणेष्वग्न्यादिषुक्रमात
अनंगकुसुमाचैवतथाचानंगमेखला त
थानंगमादिमदनाप्यनंगमदनातुरा २१ अ
नंगरेखाचानंगवेगाचानंगपूर्विका अंकु
शाचतथानंगमालिनीपरमेश्वरी २२ म
हासौभाग्यदाचक्रेकटवर्णविराजिते सं
प्रदायाख्ययोगिन्यःसर्वाभरणभूषिता २३
रक्तोत्पलनिभाःसर्वाःसगर्वास्मरयौवनाः
पाशांकुशौदर्पणंचपानपात्रंसुधामयं २४
विभ्रत्यःसर्वसुभगाःपश्चिमादिविलोमतः
शक्तीःप्रपूजयेद्देविसंप्रदायेनसिद्धये २५
सर्वसंक्षोभिणीशक्तिःसर्वविद्राविणीतथा
सर्वाकर्षणिकाशक्तिःसर्वाह्लादकरीप्रिये
सर्वसंमोहिनीशक्तिःसर्वस्तंभनकारिणी
सर्वजृंभनिकानामशक्तिःसर्ववशंकरी

सर्वार्थिरंजिनीशक्तिः सर्वोन्मादनकारिणी ३३
सर्वार्थसाधकोशक्तिः सर्वसंपत्तिपूरिणी
सर्वमंत्रमयीशक्तिः सर्वद्वंद्वक्षयंकरी सर्वा
र्थसाधके चक्रेणमवर्णविशोभिते ३४ ज
पाकुसुमसंकाशास्फारमणिविभूषिता
महासौभाग्यगंभीरापीनवृत्तघनस्तनी ३५
रत्नपेटीविनिक्षिप्तसाधकेप्सितभूषणान्
नानारत्नमयान्दिव्यानददतीतिस्मितानना: ३६
पाशांकुशौ च दधती संस्मरेत्कुलयोगिनी:
पश्चिमादिविलोमेन पूजयेत्सर्वसिद्धिदा: ३७
सर्वसिद्धिप्रदादेवी सर्वसंपत्प्रदा ततः स
र्वप्रियंकरी चैव सर्वमंगलकारिणी ३८
सर्वकामप्रदा देवी सर्वदुःखविमोचिनी
सर्वमृत्युप्रशमनी सर्वविघ्ननिवारिणी ३९
सर्वांगसुंदरी देवी सर्वसौभाग्यदायिनी
सर्वरक्षाकरे चक्रे मत्तवर्णविभूषिते ४०
पश्चिमादिविलोमेन निगर्भयोगिनीर्जपेत्
उद्यद्भास्वत्सहस्राभामुक्तालंकारभूषिता ४१
पाशांटकायुधयज्ञानमुक्तावरलसत्करा: दे
वीप्रपूजयेदेता: यथेप्सितफलप्रदा: ४२

सर्वज्ञा सर्वशक्तिश्च सर्वैश्वर्यफलप्रदा सर्व
ज्ञानमयी देवी सर्वव्याधिविनाशिनी ४३
सर्वाधारस्वरूपा च सर्वपापहरा तथा सर्वा
नंदमयी देवी सर्वरक्षास्वरूपिणी ४४ सर्वे
प्सिताफलप्रदा दशमी परमेश्वरि सर्वरो
गहरे चक्रे वर्गाष्टक विजृंभते ४५ पश्चि
मादिविलोमेन रहस्यायोगिनीर्यजेत् श्री
पीठपरितो यस्ता दाडिमीकुसुमप्रभाः ४६
रक्तवस्त्रपरीधाना रक्तगंधानुलेपनाः रक्त
पुष्पार्चितैः सम्यक् पूजयेत्सर्वसिद्धिदाः ४७
नानाभरणगंभीरा पंचबाणधनुर्धराः पु
स्तकं वरदानं च दधती वर्गसंस्थिताः ४८
वर्गाष्टक महावर्णी विंदुनादांकितालिखेत्
अवर्गांते रेफवत्स्थावामकर्णेंदुविंदुमत् ४९
देवीवाग्देवता पूज्या वशिनी नाम सुंदरि क
वर्गांत कलयुता परा कामेश्वरी लिखेत् ५०
चवर्गांत नवस्था छं वामनेत्रेण शीसम अ
नैन मोहिनी स्यात् टवर्गांतेन ततः परम् ५१
वायुस्था वामकर्णेन्दुनादसंयुक्त मलां यजेत्
तवर्गांतजकालाग्निवामा ही तु कलान्विका ५२

अरुणां पूजयेद्देवि पवर्गान्तेषु कथ्यते मोम
जीवमहीनीरवायुसर्व्योशभूषितम् ५३
अनेन ज्वालिनी पूज्या पवर्गान्तेषु कथ्यते फ
रेफकालपवनश्रवर्णान्तेन पूजयेत् ५४
सर्व्वेषमीसवर्गान्ते दमावह्निसविंदुमत्
अनेन कौलिंनीं देवीं पूजये दष्टसीद्धय: ५५
अष्टकोनमहेशानि पत्रावाग्देवता यजेत्
सर्व्वसिद्धिप्रदे चक्रे त्वकथेश्रमहाहवै: ५६
त्रिरेखा सर्व्वशोभाढ्या समस्त्राणि विजृंभते प
रापररहस्याख्या योगिनी पूजयेत्क्रमात् ५७
पश्चिमादिक्रमेणैव युग्मयुग्मविभेदत:
कामेशस्य च कामेशा बाणा: साधारणा प्रिये ५८
तत्त्र्यं यत्तन्हितीयं च विंदुनादांकितं क्रमात् ५९
कामेश्वरस्य कामेश्या: चापयुग्मयजेत्प्रिये
अन्तेतो विंदुनामाढ्यो हल्लेखा पाशबीजकं
कामेश्वरस्य कामेश्या: क्रमेणापरमेश्वरी ६०
अङ्कुशास्तु समानस्यात्तु मध्या पूजयेत्सुधी च
तुर्दिक्षु विशोभाढ्या यौवनोन्नतविग्रहा: ६१
रक्तविद्युल्लताकारा उद्दामकुसुमान्विता: ने
वरत्नविशोभाढ्या सर्वसौख्यकरा: क्रमात् ६२

द.म.
६८

जंभमोहवणास्त्रभपदंमंबाविताःशुभाः श्री
गाचरणवालित्तश्चाद्युयाष्टकमर्चयेत् ६३
कोणत्रयेषुसंप्रमालितैः कूटत्रयान्विताः
कामेश्वरीचवज्रेशीततोयाभगमालिनी ६४
कामेश्वरीशुक्लवर्णाशुक्लमाल्यानुलेपना मु
क्ताफलस्फुरद्रत्ननानाभरणभूषिता ६५
पुस्तकंचाक्षसूत्रंचवरदंचाभयंक्रमात् द
धतीवाग्भवःप्रज्ञाहृच्छक्तिःप्रकीर्तिताः
वज्रेश्वरीकुंकुमाभास्फुरद्रत्नविभूषिताः
बालार्कवसनानीलकर्णकुंचितलोचना
इक्षुकोदंडपुष्पेषुवरदाभयशोभिता व
ज्रेश्वरीदहमारीविघ्नशक्तिर्महेश्वरि ६६
उत्तरेभगमालांवासंध्यासंततहेमभा श्री
नर्घ्यरत्नरचितभूषणाभुवनेश्वरी ६७ पा
शांकुशज्ञानमुद्रावरवाणकरांबुजा ब
लशक्तिर्महेशानीतापत्रयनिकृंतिनी ६८
सर्वानंदमयीनादरूपेशावृत्तिगोचरे या
गायत्ररहस्या[illegible]नीरतिप्रविका ७०
त्रिकूटायाश्चतस्रस्यामहाविद्युरसुंदरी
श्रीविद्यापञ्चयेदेविविन्मायीब्रह्मरूपिणी

तर्पणानि पुनर्देव्याः रूपयुग्माद्वेनेयजेत १२
मानेनैः प्रकर्तैर्देवीं पूजयेत्कृभिः प्रिये मुद्रा
सर्दृशाये स्मश्रीवपूककुंकुमसप्रभा १३ ना
नालंकारसंभगा त्रैलोक्यवशकारिणी स्व
स्वमुद्राः कराः सर्वाः श्रीविद्यासमुद्भवाः स्मरेत् १४
प्रतिचक्रतमुद्रास्तक्रमाद्वेकेश्वरीं यजेत्
ततश्चक्रमध्यमध्ये तु त्वागपूजागता प्रिये १५
त्रिपुरा स्फटिकाभासा मुक्तारत्नविभूषिता
पुस्तकं चाक्षमालां च कलशं पद्ममुत्तमं १६
दधतीं चिंतयेन्नित्यां सा महापापविनाशिनी
त्रिपुरेशी सूर्यवर्णा पासुंदरी कुंकुमसप्रभा स
र्वालंकारसंपन्ना पुस्तकं चाक्षमालिकां व
राभयौ च दधती सा मर्त्यस्मितानना १७
श्रनपा सहर्षी देवी ध्येया त्रिपुरवासिनी आ
रक्तलोचना प्रांते महामदविघूर्णिता १८
त्रिपुराश्री महेशानि पीनवृत्तघनस्तनी उ
द्यद्भानुसहस्राभा दिव्यालंकारमंडिता १९
पुस्तकं जपमालां च वरदं चाभयं करैः द
धती सकलानंदा मालिनी कथ्यते पुनः २०
रंद्रगोपप्रभा देवी पाशांकुशकपालिनी स

सं·दं· ८९

द्रामीतिद्वादशमस्यक्रमस्यसाधकानंददायिनी ८१ २
सिद्धा वा परमेशानि ध्यायेद्विघ्नविनाशिनीं
संपत्प्रदा भैरवी च महासिद्धिप्रदायिनी ८३
क्रमेण सिद्धिसहिता प्रतिचक्राधिदेवता अ
स्य पद्मं परमेवेदं ज्ञात्वा चक्रं समर्चयेत् ८४
पादुकां पूजयामीति नमस्कारस्ततो भवेत्
स्वाहा होमे तर्पणे तु तर्पयामीति संस्मरेत् ८५
अथवा रस्पयः सर्वीदेवीरूपेण चिंतयेत् ८६
श्रीचक्रे परमेशानि स्वमंत्रे स्वस्वसन्निभाः
गोपितं मंत्रया भद्रे स्वयोनिरिव पार्वति ८७
इति श्रीदक्षिणामूर्तिसंहितायां श्रीविद्या
यजनविवरणं नामैकोनत्रिंशः पटलः
२९ श्रीईश्वर उवाच नैवेद्यं षड्रसोपेतं का
मयेत्तु पवित्रितम् दत्वा कर्पूरसहितं तां
बूलं परमशोभये १ नित्यहोमं प्रकुर्वीत
पूर्वोक्तविधिना प्रिये यथाशक्ति जपं कु
र्यात् स्तुतिं च परमेश्वरि २ आदिश्लोक
द्वयेनापि तथा सौभाग्यदेवताम् सर्वाण
रौप्यकांस्यादिपात्रे वसुदलं लिखेत् ३ गं
धेन चरुकं मध्ये मुद्रां वा तत्रैव न्यसेत्

वह्निपत्रेषु चाज्येन पूरितान् नवदीपिकान् ४
भ्रामयेद्दत्तविद्याभिस्त्रियाप्यानातमस्तके
मूलेन वा स्मरेद्देवं सर्वविघ्नोपशान्तये ५ स
मस्तचक्रचक्रेशी पूते देवि नवात्मके श्रा
र्त्तिकमिदं दे विश्रृहाण मम सिद्धये ६
मंडलं वा मतः कुर्यात्साधको भूमिजानुमा
न् वद्धमुष्टेन हस्ताभ्यां मंडलोद्धारलक्षणं
वत्तरस्त्रैकोमचक्रं मंत्रेणानेन पूजयेत्
तारं च भुवनेशानीं व्यापकादि च मंडले ७
ड. नवर्णाचलं मंत्रो मनुः सूर्यात्तरो भवेत्
श्रोत्रोदमिश्रभागेन साधारं प्पपूजितं
संस्थाप्य पात्रं तत्रैव कलशेन बलिं हरेत्
तारं परां सर्वविघ्नकृद्भ्यः सर्वं च भूलिवित ९
नेभ्योऽकुं वह्निजायावधि वारो वारणं बलिः
पूर्वोक्त बलिदानं तु कुर्याद्विघ्नोपशान्तये ११
चतुर्थी बलिदानं तु विघ्नलोके मंडले भवन्
ततः कुमारीं संतर्प्य विप्रेस्नान पाथवा १२
मयूषा मरमे पाणा मासंभाविमत्रविन्नमः
विवर्ण्य शक्तिचक्रस्य स्वामिनी संविदंपरां १३
योजयेदात्मनिज्ञानगाहनेकृपया गुरोः

शिवकोणे शेषिकाभ्यो निर्माल्यमिष्टये हि पिन
र्द्धेयांत्रततो देवि गुरवे गुरुमंत्रवित् नाम
मंत्रेण चक्रस्य मन्त्रं पयेदुपदेशतः १५ वा
ममार्गेण देवेशि तत्त्वमुद्रायरो शुचिः पुन
राधारगकुर्याद्धारं दीपलक्षणम् १६ आ
रार्त्रिकस्य मध्यस्य मूलेनैव तु भक्तयेत् क
पालिमावापि पात्रत्व धावापि समुद्धरेत् १७
द्वितीयं तत्त्वयाद्वते संयोगेनैव पार्वति त
त्त्वत्रयेण संयोगान्नर्पये त्सात वासिनी १८
प्रथमं ब्रह्मरूपं त्वं द्वितीयं सर्वमंत्रवित्
तृतीयमीशरूपं च विज्ञेयमनुविन्नमः १९
किंचित्तुलास्य मुद्राभिः पंचभिः परमेश्वरि
आकृष्य मंत्रानन्तत्र स्थाप्य शेषिकाभ्यो हितां
दिकं हत्वा तु परमेशानि सर्वीभूयात्मस
शयः अनिर्वाच्यमविज्ञेयमद्वैतैकस्थितं म
या २२ जालान्तरेण मायेन चंद्रदीपं न च
प्रिये गोपितं मंत्रयामध्ये जननी जारगार्भव
ते २३ इति श्रीदक्षिणामूर्तिसंहितायां बलि
यजनविधिर्नाम त्रिंशातितमः पटलः ३०
पार्वत्युवाच होमादि सूचितं देव सम्यग्वि

स्मारितं नहि साधकानां हितार्थाय कृपया क
थय प्रभो: १ श्रीईश्वर उवाच शृणु देवि प्रव
क्ष्यामि श्रीविद्यामंत्रसाधनं शर्मीर्ह्र्वां कुरा
स्य यत्फलं वैरके संभवः २ श्रीचक्रं पूजयेद्दे
वी मासमात्रं समाहितः सहस्रजन्मजं पा
पं हंति मासेन देशिकः ३ पूजयेद्रत्नखचि
तं चंपकैः स्वर्णजैः प्रिये अवश्यं सर्वकाले
षु परमात्माधरो भवेत् ४ नाशयेत्सर्वपापा
नि कोटिजन्मभवान्यपि समुद्रवलयापृथ्वी
संप्राप्य सुखमेधते ५ निसंयः पूजयेद्दे
वि चंपकैः रजतोद्भवैः सबुद्धिमान्भवेद्देवी
सर्वत्र विजयी भवेत् ६ पश्चिमाभिमुखं लिं
गं रत्नं स्वयमथापि वा स्वयंभूर्बाणदेशो वा श्री
वस्थाने महेश्वरि ७ तत्रस्थित्वा जपेन्मंत्रं प्र
वालाक्षजा तथा मुक्ताफलोद्भवा पद्मादे
स्फटिकोद्भवया थवा ८ माणिक्यपद्मरागा
दिमतो ह्यर्थी जपेत्तु यः जप्ते लक्षैकमात्रे तु
भूचर्यो विघ्नकारकाः ९ तासामपि यदा ना
सो दोषमयाति मनागपि तदा लक्षत्रयं कु
र्यान्नियमेन सुधीर्बुधः १० मानसेनाथवा

द॰स॰ वाचोपांशुनावाजपेत्रुयः मानसोच्चारणाद्दे
७१ विजपकोटिफलप्रदं ॥ उपांशूच्चारणाद्दे
विवाचिकंशततथाभवेत् वाचिकत्तु सहस्रमा
त्रंस्यात् श्रीगुरोराज्ञयाप्रिये १२ नरशाखो
नह्योमंस्यात् क्रमस्तमेवब्रह्महत्वजैः क्रमस्तमग
छंर्जुरूयानमृत्युविनयंसमस्ततेः १३ सिद्धा
भवतिविधेयमविद्यानाशिनीमता योनि
रूपंभगाकारे वर्तुलेत्वर्थजेप्रिये १४ नव
त्रिकोणचक्रेवाचत्तरसेवयाप्रिये वाक्य
तिर्योनिरूपेतभगेचाकर्षणंभवेत् १५ वर्तु
लश्रीप्रदंदेविराष्ट्रंतत्तभयंभवेत् नवत्रि
कोणमहतिविचरीसिद्धवाभवेत् १६ चतु
रस्रेत्तुसकलंशुभज्ञांतभवेत्सदा शांतिक
पौष्टिकलक्ष्मीरारोग्यपचमश्रवादिकं १७ प
द्माकेदशसिद्धिस्तसाधयेन्नात्रसंशयः म
ल्लिकामालतीमिश्रविमयार्कैर्वचःपतिः १८
करवीरैर्जपापुष्पैमहृतैर्भुवनत्रये योषिद्ध
श्यततादेविकर्णिकारकुसुमनंदे १९ मगास्मि
श्रितंकृत्वाकामसौभाग्यवान्भवेत् चंपकैः
पाटलैरम्यस्तास्रैरम्यफलैर्जनेत् २० स

प्राहमांत्रयोनिसंभलक्ष्मीप्राप्नोतिमंत्रवित् ।
श्रीखंडमगुरुंदेविकर्पूरंगुग्गुलंकुनेत् २१
समग्रधूपस्तद्योवश्यणस्तनभवंतिहि फ
त्वापलंत्रिमधुक्तोविचारात्वचनप्रथ्य २२
दधिक्षीरमधुसर्पिःलाजाकृत्वानकालभाक्
श्रयवानवलंदेतज्जपेद्विंध्यासमाहितः २३
नदश्रांशेनहोमस्तुपूर्वोक्तविधिनायजेत्
साधयेत्सर्वभूर्लोकपातालतलवासिनः २४
राजिकालवणंप्रांतहोमयेज्जगतीमिमां
दश्याशतोष्टकंकृत्वाकालस्यसंविनाशयेत् २५
हुतक्षीरद्रुयादाघृततोष्टशतंकभवेत् म
धासगुग्गुलेनैवराजेंद्रवशमानयेत् २६
श्रीरोग्यहुतहूर्वांप्रांहवनेनशतोष्टकं मधा
ज्याक्तैरक्तवर्णैःकरवीरैःसगुग्गुलैः २७ फ
नेलंद्वंवशीकुर्यात्विंशत्तिधरणीभुजां
मध्वाक्तकरवीरैस्तसागरंभूपवशंनयेत् २८
समराजेणाचाजेनशापिनाग्पूर्ववयजेत् पा
टलैर्यूथिकाकुंदैःशतपत्रैस्तजातिभिः २९
मालतीनवमल्लीभिमल्लिकापद्मकिंशुकैः
पूजनाद्दूनवान्वापिभिश्रैर्वाभिष्ठितैरपि ३०

दे॰से
७२

सर्वसौभाग्यमाप्नोतिधुध्यावाक्यतिहच्यते
मुचकुंदैः बिल्वपत्रैः फलैरमितनीरजैः ३१
जगारैराजपेश्चापि सिद्ध्यै होमं वदति हि ना
रिकेलैश्च खर्जूरैर्द्राक्षाभिश्चूतसत्फलैः ३२
मनसा चिंतितं कार्यं साधकस्य तु होमतः पू
जनेन च होमेन श्रीविद्यां परितोषयेत् ३३
चरुं विकीर्य सर्वत्र कुमारीपूजनादिभिः ब
टुकबलिदानेन गुरुं संतोष्य चक्रमात् ३४
सुवासिनीश्च संपूज्याद्यादूरिधन्नसतो स
मंयंकुसुमहोमेकुसुमावकुथाकुनेत् ३५
नारिकेरोत्तमफलैः सकलैस्तु मनःप्रिये स
मग्रेणैवभूतस्य फलेन वरदं तथा ३६ पू
नेसैर्फलगर्भस्थैगौरवीजादिकैतैकुनेत् जां
बूफलं समग्रस्यात् द्राक्षां चैव तथा कुनेत् ३७
रंभाफलं मनोभाग्यं लब्धुं चैतं वदितं न हि फ
लं लब्धुं समग्रस्यात्कस्तूरीकुंकुमं पाशी ३८
गजामात्रकुनेद्देवि तिलराशं तं कुनेत् तथै
व लवंगलाजामुष्टिमात्रकुनेद्बुधः ३९
मंत्रं तु ग्रासमात्रं तु पक्कान्नं च तथा भवेत्
पुंस्त्वं कर्मकार्येन श्रीविद्याक्रमकाकृतिः ४०

तथागुरुंकृतेदाज्यमनःसंतोषकारिभिः
नचतद्गुणभेदेनदर्शयिद्रव्यैकृतेस्मदा ४१
सर्वासामकृतीनांतमानेदेविमनःप्रियं
कुंडस्यपूजनंवह्नेमहाविघ्नविनाशनं ४२
चतुर्विंशतिसंख्याभिरंगुलीभिस्तुविस्तृतं
खातंचरचयेत्कुंडंसर्वत्रसुमनोहरं ४३
चतुरस्रंसर्वेनेत्रस्तुमगंमेखलाततः स
र्वैकांगुलसंक्रांतिस्तःकार्यास्तुशोभना ४४
श्रादिसवसुवेदानांसंख्यांगुलिभिस्ततः च
तुरंगुलविस्तारास्तिस्त्रोपिपरमेश्वरि ४५ कुं
डस्यपश्चिमेभागेयोनिंकुर्यात्सुलक्षणां रंभ
गुलस्तुविस्तारंवस्वंगुलस्तुविस्तृता ४६ म
ध्येछिद्रंगुलंदेविस्यागुलस्तुद्वामनोरमां लं
ह्नाणांचतुरस्रस्यकथितंतववसुंदरि ४७ प
तस्मिन्मातियद्वास्यंतदस्येवतथाभवेत ते
नमानेनसर्वाणिकुंडानिरचयेद्बुधः ४८
गोमयोदकसंलिप्तेपूर्वास्यप्रिमदिगता द
क्षिणाग्रुतरांनातंतिस्त्रस्तिस्त्रकारयेत ४९
प्रणवेनाभ्यस्यमध्येकल्पयेद्यागविष्टरं शा
कैरांविकरेतत्रत्रिकोणंतत्संटंलिखेत ५०

६.सं
७३

तद्बहिर्वसुपत्रं च ततो भूमंडलं लिखेत् उप
युपरि भेदेन ततः पीठं समर्चयेत् ५१ मंडू
कं च तथा रुद्रं कालाग्न्याख्यं ततः परं आधा
रशक्तिं कूर्मं च ततोऽनंतं वराहकं ५२ पृथि
वीं च तथा कंदं नालपद्मं च कर्णिकां पत्रा
णि केशराण्येवं ततः स्थाने प्रपूजयेत् ५३
धर्मं ज्ञानं च वैराग्यमैश्वर्यं पीठदिक्षु च नञ
र्थांस्तेषु कोणेषु पीठस्योपरि पूजयेत् ५४
शनस्तोरेण संपूज्य यागाविघ्नकं यजेत् मध्ये
ऽत्र मतिं विश्वमातरं वेदमस्तकं ५५ पुरु
षाधिष्ठितां ध्यात्वा तद्योनौ संपुटस्थितां
वह्निकुंडोपरि भ्राम्य किंचिदंगारकं न्यसेत् ५६
अस्त्रमंत्रेण सकलान्मंत्रान्संत्रापयेत्सुधीः
पश्चात्संज्वालयेद्वह्निं तान्नाग्निं संक्रमय्य तु ५७
दीपाद्दीपांतरन्यायात्स्फुरंतं सर्वतोमुखं स्व
समार्गेण मनुविद्योनिमार्गेण संक्षिपेत् ५८
कुंडे त्रिकोणमध्ये तु तत्र प्रज्वालयेद्बुधि
श्राद्दैर्व्याहृतिभिः पश्चाद्वह्निमंत्रेण चक्रमात्
चिमिंगलहनं हं हं दहदहं हं पचचस्थिया सर्वा
ताज्ञापय स्वाहा मनुनापार्थियेन्नतः ६०

अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनं । सु
वर्णवर्णममलं समिद्धं विश्वतोमुखं ९१ उ
पस्थानं विधायैवं जिह्वांगानि प्रविन्यसेत्
शषसवलरायक्षबहस्वरसमन्विताः ९२
बिंदुनादांकिताः सप्तजिह्वाणाः परिकीर्तिताः
पद्मरागासुवर्णा च तृतीया भद्रलोहिता ९३
लोहिता च तथा श्वेता धूमिनी च करालिका
क्रमेण योजयेद्बीजैर्विन्यसेत्परमेश्वरि ९४
पलिंगगुदमूर्धास्यनासानेत्रेषु वै क्रमात् सु
राश्च पितरश्चैव गंधर्वा यक्षपन्नगाः ९५
पिशाचा राक्षसाश्चैव सप्ततेष्वास्तास्तु सप्तसु
महस्रार्चिस्फलिंगिण्युत्कृष्टपुरुषस्तथा ९६
धूमव्यापी सप्तजिह्वा धनुर्धर ईरिताः उ.
ल्पदैः षडंगानि ततो मूलष्टकं न्यसेत् ९७
जातवेदः सप्तजिह्वो हव्यवाहन एव च वि
श्वोदरश्च तवर्थः स्यात् वैश्वानर उमे ततः ९८
षष्ठः कौमारतेजाश्च विश्वदेवमुखान्यसेत्
मूर्ध्नि मध्यास्यकंठेषु कटिपार्श्वांशकेषु च ९९
उ.तास्तु सकलाज्ञेया अग्निमूर्तिगकाक्रमात्
पंचविन्यस्तदेहः सन्नार्घ्याम्भसजलेन च १००

दिक्षु दर्भैः परिस्तीर्य्य ततस्तु परिशोधयेत् वैश्वा
नरं ततो जातवेदपश्चादिहावह ७१ लोहि
ताद्य च सर्वाति कर्माण्यपि च साधय स्वाहा
तोण्यं रथं तार वक्र स्त्रिस्तिंगलेन च ७२ अने
नवह्निमभ्यर्च्य ततो जिह्वास समर्चयेत् मध्ये
च कोण षट्के च ततो गानि प्रपूजयेत् ७३
मूर्तयो वस्तपत्रेषु भूर्विवेदिगधीश्वराः पुन
वैश्वानरं यष्टुं विणिणामस्तणप्रभं ७४ स्रु
क्स्रुवं रक्तरत्नभूषणापद्मस्थितं वरंप
शस्तिकं चाभीतिं दस्तैश्च बिभ्रतं ७५ अ
नेकहेममालाभिरंकितं संस्मरेद्बुधः स्व
र्णादकेन पात्राणि प्रोक्षयेच्छुद्धये ततः ७६
उत्सुवीकृत्य सर्वाणि तत्र विनिक्षिपेत् प्रणी
ताप्रोक्षणीयुग्मे जलं स्थाल्यां सायुतं तथा ७७
अन्यत्सर्वेषु पात्रेषु होमद्रव्याणि संक्षिपेत् स्रु
क्पात्रे च स्रुवपात्रे च घृतेषु छ्यं विनिक्षिपेत् ७८
स्थाली स्वर्णाल्वितांकुर्यात् सर्वतो धूपयेत्त्रिध स
विलास्तवसर्वास्तु वेष्टयेद्दीपमालिकाः ७९
त्रिपंक्त्या चाभितः कुंडं ततो माहुतिभिर्कृतेन तु
ब्रह्माणं दक्षिणे भ्यर्च्य कृत्वैशानराणतो ना ८०

गर्भाधानादिसंस्कारं चिंतयेत्सिद्धिहेतवे अ
नेनविधिनाभ्यर्च्य श्रीचक्रं तत्र चिंतयेत् ८१
तदंतरे समावाह्य महात्रिपुरसुंदरीं समस्त
चक्रचक्रेशीसहितां होमयेत्ततः ८२ दशा
ज्याहुतिभिः पश्चात्तर्पणादिकमेव तु स
मस्तचक्रचक्रेशीप्रकटाद्याश्च योगिनीः ८३
होमयेश्च हुते नैव चैकैकामाहुतिक्रमात्
ततः पूर्वोक्तद्रव्यैः होमयेत्सुभगापरा ८४
हवनं पद्मरागाद्यां सर्वसिद्धिप्रदं भवेत् रुद्रा
क्षाद्वर्णाश्च सर्वकामफलाप्तये ८५
लोहितांशो भवेच्छांतिस्तंभनं चक्रमाद्भवेत्
उच्चाटनं तु धूम्रं स्याद्वेषणं चैव मारणं ८६
इति ते कथितं देवि होमलक्षणमुत्तमं मू
तविद्याद्यशमनी नान्यथा वरवर्णिनी ८७
दीपस्थानं समाश्रित्य जपहोमं समाचरेत्
वस्त्रकोष्ठे लिखेत्कूर्मं मध्ये स्थानं प्रकल्पयेत् ८८
स्वरान्द्वंद्वविभागेन पूर्वादिक्रमतो लिखेत् का
यावर्गास्तु समस्ते तु पूर्वादिक्रमतो लिखेत् ८९
लक्षवर्णोष्टमे योज्यः कूर्मचक्रमिदं भवेत्
स्थानात्तारं यत्र देवी सिद्धिस्तत्र न संशयः ९०

स्थानादूरंसुत्विक्षेत्यापाश्वयोत्तस्यैवैकरो
तत्रस्रंसफलंमध्येकोष्ठग्रामंनमस्तुदं ११
उदरंकण्ठपृष्ठेपतस्फोटोत्पत्तिस्तोक्रमात् रो
गहानिकरैश्चच्छंतयोर्मिथ्यागतंभवेत् १२
दारिद्र्यंदुःखदंचतस्मात्कर्मसमाश्रयेत्
तत्रैवसिद्धिर्नान्यत्रश्रीगुरोराज्ञयाप्रिये १३
देशंवाकल्पयेत्स्थानंनगरंग्राममेवच दी
पेवासोपिकर्तव्यःकिंपुनर्देवनंयजेत् १४
इतिश्रीदक्षिणामूर्तिसंहितायांजपहोम
लक्षणंनामत्रिंशतितमःपटलः ३० श्री
ईश्वरउवाच शृणुतःसंप्रवक्ष्यामिचक्करा
जस्यसाधनं येनसिद्धिर्विद्यायाविनियो
गकमस्पृणु १ कृत्वासिंदूररजसाचक्रंतत्र
विचिंतयेत् साध्यप्रतिकृतिर्नाममलेखिनी
कोष्ठमांततः २ ज्वलंतीनत्तज्वालांदेवमोहि
नामयवर्जिता सत्कालज्ञामसमायातिश्रष्या
न्मात्कष्टतेप्रिये ३ तन्मध्यंसंस्थितांमश्रीचि
न्तयेदरुणप्रभं आत्मानंचतथासाध्यंतद्दोसो
भास्पहेदरः ४ ग्रहणोरूपचारैस्तुपूजये।
न्मुद्रयाक्षतः यस्यनाम्नाप्युतःसम्यक्सभवे

ह्रामपवह्नि ५ अष्टहस्त्रीनामवर्णीश्रक्रम
येविलिखेत् योनिमुद्राश्रयोभूत्वावेगाद
कर्षणंभवेत् ६ देवकन्याराजकन्यावेश्यक
न्यामध्यापिवा गोरोचनाकुंकुमाभ्यांसमभा
गंचचंदनं ७ अष्टोत्तरशताहूत्यातिलकं
सर्वमोहनं पुष्पफलजलंचान्नंगंधवस्त्र
चभूषणं ८ तांबूलपूर्वजन्मचयेमेसंप्रो
क्तेमंत्र अंगनाबीतंणाटेविदासीवत्सापि
जायते ९ करवीररक्तपुष्पैः त्रिमध्वक्तैः प्रपू
जयेत् त्रियन्मासमात्रेहिसाध्याभ्यालल
नीतनः ० इतिकुर्वन्महेशानिपूजयेदरुणे
प्रभा सिंदूररचितेचक्रेराज्ञानमोहयेत्क्षणं
त ९ त्रैलोक्यदुर्लभाचापिरंभाचाकर्षयेद्ध्रुवं
चिंतागारेणचक्रंतुलिखित्वाकद्रवेणहि ९
वश्यावाहोथवाक्षोभावास्वरंनाशयतितत्क्षणात्
अर्कनिर्वदवाभ्यांतुलोविमार्कस्यसंलिखेत् ॥
रुद्रयोनीमसाध्यवाप्येदशचक्रस्यसंलिखेत्
गामध्येस्थापयेत्तत्ववशमवेहिट्ठेघटांतमात् १२
धूपयेत्चंदनंराज्ञेवस्त्रवायाधारयेततः अष्टो
त्तरशताहूत्यामोहयेद्भुवनत्रयम् १३ लिखे

द. स.
७८
76

गोमयभूमौतुलिखेद्रोचनयाततः सनू
पोप्रतिमास्याभूषाकोपरिचिंतयेत् १९
तद्गलगलहृन्नाभिजन्मंमूलयोजितां
जन्मनामामहाविद्यांसकुंसांतविदर्भितां
सर्वांगसंधिसंलीनांकामकूटसमालिखेत्
साध्यासाभिमुखीभूत्वाश्रीविद्यामासविग्रहः
दोर्भिण्यीवीजमुद्रांयाविद्यामष्टशतंजपेत्
योजयेत्तांकामगेहेचइस्तूपकलात्मके २०
मात्रागातिविकलाकामसंहायकपीडिता
त्रैलोक्यंसंदर्शीनामत्ताण्डायायातिमोहिता
स्पृष्टवामास्त्रिकोंचक्रवाहेसंवेष्ट्यमन्त्रवित्
वक्रंप्रपूजयेत्सम्यक्विद्यापूर्णांचधारयेत् २१
श्रवर्ष्याःसर्वदुष्टानांव्याघ्रादीनांनसंशयः
श्रीखंडागरुकस्तूरीकर्पूरैश्चसकुंकुमैः २१
स्वनामकर्मतोलेख्यमेवंवन्मात्रकांलिखेत्
तेनाजरामरत्वंतुसायकस्पनसंशयः २२
कामकूटेनदेवेशिसंदर्भ्यष्टयगान्तरम् सा
ध्यनामचिक्रकोणान्तमातृकांवेष्टयेद्बहिः २३
स्वर्णामयपगांतयांदीपिशिखावाद्यायत्रकुत्रचित्
लोकपालाश्चराजानोदुष्टाश्चलोकाःपूजिता

तेसर्वे वशमायांति सन्निपातादयो ज्वराः
अनेन विधिना मायुपुरीं संदर्भसंलिपेत् २ ३
वस्त्रखंडे मध्यदेशे दिक्षु पूर्वादिषु क्रमात्
तस्य सो भागमायाति राजानः किंकराः सदा २४
स्फुरत्तेजोमयी पृथ्वी प्रज्वलंति चराचरं
चक्रांतश्चिंतयेन्नित्यं मासषट्कं ततो नरः २५
तेन कंदर्पसमगो लोके भवति निश्चयात् २६
दृष्ट्वाकर्षयते लोकान्विषं नाशयति ज्वरान्
तथा विषं च हरति दृष्टावेशं करोति च रात्रौ
सिंदूरलिखितं पूजयेदेकचित्ततः २७ क
रोत्याकर्षणं दूरायोजनानां शतादपि अ
ष्टविदिक्षु कोणेषु क्रमेण परिपूजयेत् २८
यद्यात् दैवलोकोपि वश्यो ... नामसंख्या
भूर्जपत्रे लिखित्वाक्रोचनागुरुकुंकुमैः २९
स्वनाम दर्भितं ऊर्ध्वादेशे वा पुटमेदनम मं
डलं विषमस्थाने भूमौ चक्रं निधापयेत् ३०
धारयेद्धातनो मंत्री पुरंतो भयति तत्क्षणात् ३
न्मतरसलाक्षार्कक्षीरकुंकुमरोचना ३१
कस्तूर्येलकसहितापकीकृतमंत्रसलिखित्
यन्नामातस्य देवेशि चौरजंमाथिजभयं ३२

सं.दं.
८८

गृहजं व्याधिजं चैव रिपुजं सिंहजं भयम् अ
हिजं वाजिजं वापि सर्वं नाशयति क्षणात्
रोचनाकुंकुमाभ्यां तु मध्यमां संलिखेद्बुधः
त्रिकोणे भयगां चैव साध्यनामांकितामधः
तच्चक्रं धारयेत्तस्मात्समाहात्किं करो भवेत्
पीतद्रव्येण चक्रांते लिखेद्विद्यामयत्नतः २५
साध्यनाम विलिख्येतस्य वैश्यादिदिशि संक्षिपेत्
तस्माद्धलापि जीवोपि सर्वज्ञो मूकतां व्रजेत्
अनेन विधिना नीलीरसेन विलिखेत्ततः द
क्षिणाभिमुखो मंत्री वस्त्रे दग्धारिष्टन्दसेत् ३०
महिषाश्वपुरीषेण गोमूत्रेण च संलिखेत्
आरनालास्थितं कुर्यात् भवेद्विद्वेषणं क्षणात्
साध्यनाम लिखेन्मध्ये काममध्ये नसंवयेत्
संलिख्य रोचनाद्रव्यैराकाशे द्दिशांतथा २८
शत्रूच्चाटयेदाशु स्त्रोच्चाटोयमीरितः म
हा नीलीरसोद्भिन्नारोचनाद्यमिश्रितैः २९
लाक्षारसैर्लिखेच्चक्रं च तद्वर्णानि वशं नयेत् अ
नेन विधिना नीरे स्थापयेत्तज्जलेन तु ४० सौ
भाग्यमद्दासोति स्नानपानान्न संशयः पी
तेचक्रं यजेत्सर्वं स्तंभयेत्सर्ववादिनः ४१

सिंदूर… लितं चक्रमुत्तरे लोकवश्यकृते प
श्चिमे पूजितं चक्रं गोरिकालिखितं ततः ४४
मंत्रिणो टवनावश्यं किंपुनर्योषितः श्रिये
स्तंभं विद्वेषणं ध्यायिमुच्चाटं कुरुते नरः ४५
उग्रये वश्यकरं रक्तं सिंदूरोचना लिखितं दृष्टात
दग्धात हरिद्रि मध्यस्थं सर्वशत्रून्विनाशयेत ४६
गोमूत्र मध्यगं चेत द्वेषोच्चाटं नरिपोः वि
द्वेषणं भवेच्चक्रे तेनैव परमेश्वरि ४७ सिं
दूरेण लिखित्वा चक्रं निर्जने चच्चतुष्पथे सर्व
वाधान्ध्यारभ्य मध्यान्तं मात्रकालिखित ४८
कुलान्धारकमेणैव राज्ञो संपूजयेत क्रमं सा
धकः क्षिप्र रोदे वि जायते नात्र संशयः ४९
चतुर्दशं निशि यस्यो हदुभूमौ प्रपूजयेत
घणमासं सर्वमेघा तेन सादानुष्ठ्रष्टवा परः ५०
श्रूजनं विवरं सिद्धिं गुलिकां पादुकां जपं
खड्गं सौभाग्यवेतालं पाहिनी चेटकादिकं ५१
सकलं सिद्धिजननं मत्रो माप्नोति नान्यथा
चतुर्दशं चतुर्दशं प्रम संपूज्या समाहितः ५२
एकविंशति रात्रं तु निशि प्रेतशिलातले
श्रीचक्रं पूजयेन्नदृष्टत्वर्ग स्पुसाधकः ५३

पाशांकुशधनुर्वाणैः पोरुषैघैमेह्यरि का
मोभूत्वा स्वर्गभूस्तपातालतलशोभिता ५६
हृतोकृतास्वयंचैवमहद्दाकर्षणं भवेत्
तत्त्वकामेश्वरीशक्तिर्देव्यात्माभुवनत्रये
ब्रह्माकर्षिणीचैतद्राज्ञानः किंकरा प्रिये
एतत्कामकलाध्यानं कथितं बीजभेदतः
वाग्भवाराधने देवि ज्ञानं सारस्वतं भवेत् स्त्री
णाम्भरणेवस्राद्यांस्तत्पुष्पैः समर्चयेत् ५७
अनेनविधिनादेवि वाग्भवाराधनं भवेत्
अथ कामकलानामसामर्थ्यं शृणु पार्वति ५८
कामममन्मथकंदर्पमकरध्वजपञ्च महा
कामस्य पूर्वाक्रमपञ्चकामाः क्रमेण तु ५९
कामं मन्मथमध्यस्थं देवि कंदर्पिवेशमं ग
तस्तटस्थमीनकेतु महाकामेश मस्तकं ६०
अनेन कामतत्वेन मोहयेज्जगतीमिमाम् सू
लादिसृष्टिसंहारविसृतं तत्तनीयसीम् ६१
तस्मात्कुंडलिनी शक्तिः शक्तिकूटे महेश्वरि
त्रिकूटात्रिपुरादेवि सर्वसिद्धिप्रदा भवेत् ६२
वेतः पश्चिमतः कोमोयोगिनीनां महोज सं
वकमेतत्समाश्रित्य समस्तसिद्धिप्रदा सदा ६३

इतिश्रीदक्षिणामूर्त्तिसंहितायांविद्याप्रयोग
बीजसाधनंनामपंचत्रिंशतितमःपटलः
श्रीईश्वरउवाच अथदीक्षाविधिंवक्ष्येउले
ऽंभुवनत्रये पूर्वोक्तेनप्रकारेणनवयो
न्यंकितांतरं १ बुध्यासंयोजयेन्मंत्रीघ॰
ध्यास्यंस्वप्रजायते वसुकोणंद्वादशारंषो
डशारंततःप्रिये २ द्विदशारंहृत्तत्रयुग्मंततो
ष्टदलमालिखेत् भूबिंबंचततोमध्येसृज
येत्रिपुरांपराम् ३ आदावंगानिसंसृज्यत्रि
कोणेषुरतित्रयम् मातरोष्टारपत्रेषुवा॰
माद्यानवयोनिषु ४ नित्यानिरंजनाक्लि
न्नाक्लेदिनीमदनातुरा मदद्रवाद्राविणी
वहुचिराभगावत्यथ ५ कामेश्वरीतथा॰
कामदीपिनीकामुकेश्वरी ललिताद्याभि
णीसुंदरीस्वछंदललिताक्रमात् ६ शंकरी
भीमभावाचकमलाकमलेश्वरी नीलग्री
वाविशालाक्षीभेरुंडापरमेश्वरी ७ कला
योनिषुसंसृज्यततोविंशतियोनिषु मायाव
तीमहालक्ष्मीचततःसर्ववशंकरी ८ सम्या
समयेशानीनित्यानंदामहोदया सर्वसो।

ग.६
३१

दं.सं.
७९

भाग्यदां नंदां चंद्रिकां चंद्रशेखरां ९ स
र्वेश्वरीं चलंपूर्णां पीठानि वसुपत्रके भू
गृहे त्रिगुरेशी च दीक्षायोग्यां कीर्तिं यजेत् १०
एतदग्रे भुवनेस्तमायारं कलशं यजेत्
विशेषार्घ्यं गायत्र्यैश्च स्वर्णरत्नैश्च पूरयेत् ११
समीपे च कराङ्गे च सम्यग्गम्यश्च देशिका
श्रीघ्रादरेण संलग्नं सुदरं नाम कल्पयेत् १२
आत्मानं योजयित्वा तु गुरुभिस्तैश्च वै ततः
स्नातिश्चागुरवः सर्वे सम्यक्प्राणति पूर्वकं १३
भूमौ लिखित्वा विधांश्च सम्यक्कुम्भादिभिर्यजे
त् शिष्याः पदर्शयेद्विद्यां प्रजंगाशतयाप्रिये
यदि स्यात्स्नमहस्ती प्रीतिः शिष्यस्य प्राणदस्तु
तं दैकोवारमात्रेण दत्वा कौलज्ञपेस्मरां १४
प्रोत्शाणीं पर्शविद्यां नदयात्कस्यचित् प्रिये
गात्रे राज्यप्रदा यापि पुत्राय प्राणदाय च १५
शांभवं तां प्रकुर्वीत ततारत्कोविचरसंतकां य
निर्वाच्योपदेशान्कलशीनां द्राक्षारणो भवेत्
कलशास्यैः पलवैस्तु त्रिवारं प्रोक्षयेत्स्वतं भ
वेत्तदाभिषिक्तस्तु ततः सोदेशिकाग्रणी १६
गंडूषं ततस्वं स्वयं कलशादर्हीं यच्छिवाञ्चैव ने १

अमद्यैर्नेवसिद्धिस्तुसविकल्पस्यपार्वति १९
नसिद्धिस्तस्यकुत्रापिश्रीविद्याविपराङ्मुखे
गुरवेदीयतेसर्वमज्ञानत्तालयेदपि २० त
स्माद्दीक्षेयमाख्यातामंत्रसिद्धिकरीप्रिये दी
क्षितःसन्महेशानिविनियोगंसमाचरेत् २१
विशेषार्घ्यविधिंकुर्यात्पश्चाद्दूतींसमानयेत्
समयाचारविधिनामंडितांसुंदराननां २२
अष्टदेवकुलोद्भूतांतरुणींचारुलोचनाम्
आनंदमुदितांग्राह्यांविरूपांविकृताननां २३
व्यंगांवृद्धांविविक्तांवकुष्ठांचैवविवर्जयेत्
भगमालासमुच्चार्यतस्यायोनिंप्रपूजयेत् २४
श्रीविद्यांपूजयेत्तत्र नवचक्रक्रमोदितां स्क
लिंगेपूजयेद्देविश्रीविद्यांषोडशाक्षरीं २५
कामेश्वरीस्वरूपांचकामेशांकविराजितां
कामेश्वरंप्रवक्ष्यामितत्रभेदेनसुंदरी २६
वेदादिपीठसंराजत्परापीठनिवासिनीम् त्रि
कूटाख्यकलादेवीशिवायचजपन्मनुं २७
स्वाधिष्ठानेचस्वार्णेननवचक्रेश्वरेणहि पूज
येत्कामरूपःसन्कामशास्त्रीवितःप्रिये २८
सीत्कारःप्रणवोदेविमायाबीजंपठ्यते त्रि

द॰मू॰
८०

80

स्नानंदंस्तुवनंस्त्र्याकुचमर्दःशिवार्चनम् २९
नखक्षतंलतादीनिपुष्पमालादिपूजनम् ता
डनंहवनंविद्धिवीजपुष्पेविसर्जनम् ३०
वीजैरेतैःसमादायविशेषार्घंनिधापयेत्
तेनामृतेनश्रीदेवींतर्पयेत्कुलमार्गतः ३१
इतिःप्रगटनादेवीविज्ञेयावीरजस्तथा न
खादिरेतोमुखानिकुलद्रव्याणिभाषयतः ३२
भैरवोयदिसंजातःसिद्धिस्तस्यनसंशयः ति
विकल्पस्तुमंत्रज्ञोब्रह्मसात्तान्नसंशयः ३३
काम्यंनैमित्तकंज्ञात्वाश्रीविद्यांपरितोषयेत्
दीक्षितस्याधिकारोत्रनान्यस्यपरमेश्वरि ३४
पुस्तकेलिखितंदृष्ट्वास्वयंज्ञात्वाकरोतियः
ब्रह्महत्यासुरापानस्वर्णस्तेयादिपातकैः
लिप्यतेनात्रसंदेहोनरकेनिवसत्यसौ ३५
इतिश्रीदक्षिणामूर्तिसंहितायांघाटीलाहृनीय
जनविवरणंनामद्वात्रिंशःपटलः ३२ श्री
ईश्वरउवाच अथवक्ष्येमहेशानिपवित्रारोप
णंमहत् यस्मिन्कृतेकृतंसर्वममयथाभ्रम
मुच्यते १ गतेसंवत्सरेयस्तुनकरोतिपवि
त्रकं पकीकृतस्यफलंतस्यनीयतेतुमनेर्वलात्

आषाढउत्तमोमासः श्रावणोमध्यमप्रिये ही
नोभाद्रपदोमासः पक्षेशुक्लेसितेतरे ३ प्रश
स्तः शुक्लपक्षस्तुतदालाभेसितेतरः वर्जये
द्दपष्टमीपूर्णिः मसीतिथिषुपूजयेत ४ पट
सूत्रंविशिष्टंतुकार्पासंजनितंतथा त्रिगु
णंत्रिगुणीकृत्यप्रक्षाल्यामलवारिणा ५
पश्चिमास्येक्रमन्त्रभिः दक्षिणैः शोधयेत्ततः
मंत्रैरथपवित्राणिमनोरम्याणिकारयेत ६
श्रेष्टानारभ्यतंत्रेष्टतदर्धमध्यमंप्रिये तद
र्धंचकनिष्ठंस्यात्यथाशक्त्याथवाप्रिये ७
उत्तरास्यादिनेमंत्रैर्दशाग्रंथीस्तुकारयेत्
विचित्रयाचित्रयाचकुंकुमादिभिरञ्जिते ८
पवित्रदानदिवसात्पूर्वेद्युरपिवात्रितौ मा
र्गेथवामंत्रनवापिकुर्याच्चपरमेश्वरि ९ ग
त्रौस्नमयिभिः सार्धंनित्यपूजादनंतरं उ
ङ्कोसिंहासनेमंत्रेसूत्रपात्रंतवामतः १०
प्रार्थयित्वास्तुवर्मोभ्यांकृत्वारक्षावगुंठने
दंतकाष्टंतथागंधमस्मचंदनमृत्तिकाः ११
सिद्धार्थश्चतथाधात्रीफलंवकुलमष्टम्
पूर्वादिद्विक्रमतः पवित्रंसूत्रभाजनम् १२

दे·स·
८१
81

अष्टम्यां पत्रपत्रीषु प्रत्छिपेन्मिष्टिदेतवे कु
मारः सोमस्वाहेशाब्रलनागाशिवोध्वजा १४
सूर्य्यः सदाशिवः सर्वः देवतास्युनेवास्वराः
सूत्रेषु पूजयेत्ब्रलविल्वौ शास्त्रविसूत्रके १५
क्रियाचपोरुषीवीरागायत्रीचापराजिता
जयाचविजयादेवीमुक्तिदाचसदाशिवाः
मनोन्मनीचनवमीदशमीसर्वतोमुखी
ग्रंथिस्थादेवताःसर्वाउपचारैःसमर्चयेत् नि
त्याषोडशदेवेषिश्रीविद्यांचस्मरेत्प्रिये अ
धिवासविधिःप्रोक्तःपश्चाद्दारायणंभवेत् १८
नित्यार्चनानंतरंतुनैमित्तिकमिदंभवेत्
समस्तेभ्यःपवित्राणिकमकाभ्यःसभोजनं १९
स्वगुरुंपूजयेत्सम्यग्वस्त्रालंकारगोधनैः य
थाशक्तिनमस्कृत्यदेवीरूपेणचिंतयेत् २०
आरोपयेत्पवित्रंतुवित्तशाठ्यविवर्जितः गु
रुःसंपूज्यतेयत्रतत्कर्मसफलंभवेत् २१
सर्वाभावेर्चयेद्देवंसगुरुगोत्रसमुद्भवम् पू
जयेत्स्वगुरुंयत्रतत्रयेत्रेताःसकलाक्रियाः
नश्यंतेनिष्फलास्तुभवंतिपरमेश्वरि २२

२४ मूलमंत्रेण चामंत्र्य पवित्रेषुक लायजेत्

कृत्वा पूर्णाहुतिं पश्चाद्गोदयाम पवित्रकं श्री
वक्रसाध्यस्सिद्धाय संपूजयेत्तां निवेदयेत् प
वैतन्न करोति व्रतस्य पूजा तु निष्फला २५
इति पवित्रारोपणविधिः श्रीईश्वर उवाच प्र
थवक्ष्ये महेशानि दमनारोपणं प्रिये पा
वित्रपर्ववत्सापि कर्तव्या साधकैः प्रिये १
चैत्रादयस्त्रयो मासाः पक्षौ सितसितेतरौ
पञ्चम्यां पूर्वपूर्वस्तु कालः सर्वोत्तमो भवेत् २
अष्टम्यां च चतुर्दश्यां पौर्णमास्यामथापि वा १
वसन्तोत्प्रकुर्वीत सद्यो वा वाथि वासनम् ३
आमध्ये दमनं चार्यं चतुः कल्पलतादिभिः
कामनेत्रसमुद्भूतरति नेत्रजलाप्लुतः ४
ऋषिणं पर्वसिद्धानां विमोहक नमोस्तु ते
शिवकार्यं समुद्दिश्य तेन त्वां स्थापिवाज्ञया ५
इत्यामं अरतिकामं तत्र संपूजयेत्सुधीः स्व
यमुत्पादमनं समूलं पल्लवैर्युतं ६ आ
नीतमथवा स्वेन मोत्पादानीतमीश्वरे वा
मतः स्थापयेद्देवि सर्वतोभद्रमण्डले ७ वा
स्वारे दमनं पात्रे स्थापयेत्पूजयेत्ततः प्र
एवं भुवनेशानीरतयेन मरुस्यापि ८ इ

तिमंत्रो महेशानि कामं मन्त्रस्तकथ्यते प्र
णवः कामबीजं च कामायेति मदनः स्यापि ९ म
त्राभ्यां पूजयेत्तत्र मदनं कलिकागतं ततो
स्तस्य पूर्वादिदलेषु पुटिकामसेत् १०
अष्टस्वष्टाष्टभिर्मन्त्रैरष्टद्रव्ययुताक्रमात् ।
कामो भस्मशरीरश्च तथानंगश्च मन्मथः ११
वसंतः सखं सजश्च स्मरश्चेक्षुधनुर्धरः पुष्प
बाणः सताराद्याः ऽ लिंदनाः प्रकीर्तिताः १२
कर्पूररोचनायुग्मं कस्तूरी च ततः प्रिये अ
गरुकुंकुमधात्रीफलं चंदनमेव च १३ स
गंधपुष्पनिकरमष्टद्रव्याणि पार्वति स
प्तम्यद्मनं सम्यक्गंधपुष्पाक्षतादिभिः १४
जपेदनंगगायत्रीं यथाशास्त्रप्रसन्नधीः
कामदेवाय इत्युक्त्वा विद्महे इति वदेत्ततः १५
पुष्पबाणाय धीमहि तन्नोऽनंगः प्रचोदयात्
नमोऽस्तु पुष्पबाणाय जगदानंदकारिणे १६
मन्मथाय जगन्नेत्रे रतिप्रीतिप्रियाय च अ
नेन मनुना देवि नमस्कुर्यात्ततः परं १७ अथ
विज्ञापनं कुर्याद्देवि मदनपाणिपुंक आ
मंत्रितासि देवेशि मया यः काले मया शिवे १८

कर्तिकं तु यथालाभं पूर्णिपर्वतवाज्ञया वि
ज्ञापनाख्यमंत्रेण विघ्नं परितोषयेत् १९
ततः संपूज्य देवेशीं गंधपुष्पाक्षतादिभिः श्री
उशार्णि जगन्मातर्वांछितार्थफलप्रदे २०
ह्य तस्यामूरय मे देवि कामान्कामेश्वरीश्व
री अनेन प्रार्थयेद्देवि पश्चाद्दमनमीश्वा
री २१ वर्मावगुंठितं कुर्याद्देहेणापि च रा
त्रितम् ततो जागरणं कुर्यात्सम्यक्श्रेज्ञा
गरो नहि २२ अथ प्रातः समुत्थाय कुर्या
द्दैनित्यपूजनम् ततो नैमित्तिकं कुर्याद्द
मनेन स्वपूजयेत् २३ तेनैव संहितां पूजां
मध्यमं पुष्पमिश्रितम् मनोहरं च विविधं व
त् कृत्वा नैवेद्यमुत्तमम् २४ मकरिंरं च ता
भूलं दद्यात्संप्रार्थयेत्ततः समस्तचक्रच
क्रेशि सर्वविद्याशरीरिणि २५ वेदमातर्न
मेतत्तुभवत्विष्टं तवाज्ञया ततः स्वगुरुमा
भ्यर्च्य पुष्पभूषांबरादिभिः २६ दत्वा दमन
कं तस्मैन मस्कृत्य प्रसाद्य च जलकेलिं त
तः कुर्यात्तशाकं सम्मधिभिः सवम् २७
अन्नदानं प्रकुर्वीत रसैः षड्भिः समन्वितम्

द॰सं॰
८३

एवं यः कुरुते विद्वान् दमनारोपणक्रमं
तस्य सांवत्सरी पूजा श्रीविद्याविहिता भ
वेत् २८ इति श्रीदक्षिणामूर्तिसंहितायां
दमनकारोपणं नैमित्तिकपूजाविधानं
नाम त्रयस्त्रिंशत्तमः पटलः ३३ ॥
सम्पूर्णोयं दक्षिणामूर्तिसंहिता शुभमस्
जम्मूमध्ये लिखिता १९५० चैत्रे